महाषोढान्यासः

५६४

रपरथकारः॥ एवंविधायप्राणप्रतिष्ठांकुर्यात्॥ स्वहृदयेहस्तंनिधायॐ
आंह्रींक्रौंयंरंलंवंशंषंसंहौंहंसः सोहं ममप्राणाइहप्राणाः ममजीवइह=
स्थितः मम सर्वाणीन्द्रियाणिवाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणाइहागत्य सु
खंचिरंस्थुतिष्ठंतुस्वाहा क्रौंह्रींआं इतिवारत्रयं जपेत्॥ इतिप्राणप्रति
ष्ठा॥ अथमातृकान्यासः॥ अं दक्षिणकरतले आं वामकरतले इंदक्षिण
करतलपृष्ठे ईंवामकरतलपृष्ठे॥ उंदक्षिणकरभे॥ ऊं वामकरभे॥
इत्यादि द्वावर्णौ दक्षिणकरांगुष्ठादि वामकरांगुष्ठपर्यंतं न्यसेत्॥ वा
मतर्जनीमारभ्य दक्षतर्जन्यंतं एकैकस्यां पर्वस्वग्रे च॥ वबनुरश्चतुरो
वर्णानितिक्रमेण कादिसांतान्विन्यस्य अंगुष्ठयोर्हंलौ सर्वांगेषु क्षका
रं न्यसेदिति करशुद्धिं विधाय मातृकान्यसेत्॥ अस्य श्रीमातृकास
रस्वतीमंत्रस्य ब्रह्मा ऋषिर्देवी गायत्री छंदः मातृकसरस्वती देव
ता मातृकान्यासे विनियोगः॥ अं कं खं गं घं ङं आं अंगुष्ठयोः
इं चं छं जं झं ञं ईं तर्जन्योः॥ उं टं ठं डं ढं णं ऊं मध्यमयोः॥ एं तं थं दं धं नं ऐं अनामिकयोः॥ ओं पं फं बं भं मं औं क
निष्ठिकयोः॥ अं यं १० अः करतलकरपृष्ठयोः॥ इत्यंगुलिन्यासः॥ ए
भिरेव मंत्रैर्हृदयाय नमः इत्यादिषडंगानि कुर्यात्॥ ततो मातृकां
ध्यायेत्॥ पंचाशद्वर्णभेदैर्विहितवदनदोः पादयुक्कुक्षिवक्षोदेशां
भास्वत्कपर्दाकलितशशिकलामिंदुकुंदावदातां॥ अक्षस्रक्कुंभचिंता

क्षितवरकरां त्रीक्षणां पद्मसंस्थां मच्छाकल्पामतुच्छास्तनजघनभ
रां भारतीं तां नमामि॥ इति ध्यात्वा अं इति शिरसि॥ आं इति मुखवृत्ते॥
इं दक्षिणनेत्रे॥ ईं वामनेत्रे॥ उं दक्षिणकर्णे॥ ऊं वामे॥ ऋं दक्षिणनासा
पुटे॥ ॠं वामे॥ लृं दक्षिणकपोले॥ लॄं वामे॥ एं ऊर्ध्वोष्ठे॥ ऐं अधरे॥
४ ओं ऊर्ध्वदंतपंक्तौ॥ औं अधोदंतपंक्तौ॥ अं जिह्वाग्रे॥ अः सर्वमुखे॥
कं दक्षिणभुजे खं कूर्परे॥ गं मणिबंधे॥ घं अंगुलीमूले॥ ङं अंगु
ल्यग्रे॥ एवमेव चवर्गं वामभुजे न्यसेत्॥ टं दक्षिणोरुमूले॥ ठं जानुनि॥
डं गुल्फसंधौ॥ ढं अंगुलीमूले॥ णं अंगुल्यग्रे॥ एवमेव तवर्गं वामोरु
पार्श्वे मूलादि न्यसेत्॥ पं दक्षिणदोर्मूले॥ [illegible] बं वामदोर्मूले॥ भं सर्व
दक्षिणभुजे॥ मं सर्ववामभुजे॥ यं दक्षिणोरुमूलादिपादाग्रपर्यंतं॥ रं वामो
रुमूलादिपादाग्रपर्यंतं॥ लं सर्वोदरे॥ वं सर्वांगे॥ इति सृष्टिमातृका
न्यासः॥ ततः क्षमित्यादि अं पर्यंतं संहारक्रमेण सर्वांगव्यापकादि
शिरोंतं यथास्थानं न्यसेत्॥ इति सबिंदुमातृकान्यासः॥ अः इत्या
दि क्षः पर्यंतं सविसर्गमातृकान्यसेत्॥ इति सविसर्गमातृकान्यासः॥
डंः ढंः इत्यादि क्षः इति पर्यंतं दक्षिणपादगुल्फसंधिप्रभृति यथा
स्थानं विन्यस्य पुनः अंः आं इत्यादि ठंः पर्यंतं वर्णान् शिरःप्रभृति
दक्षिणजानुपर्यंतं न्यसेत्॥ इति स्थितिमातृकान्यासः॥ स्थित्यं

फं वामे॰ वं पृष्ठदेशे॰ भं नाभौ॰ मं हृदयाद्य॰

तोग्रहस्थानं॥ संहारो नोपनीनां॥ ततः हंसं अं हंसः आं हंसः इं हंसः ईं हं
सः उं इत्यादि हंसः क्षं इति न्यसेत्॥ पुनः सोहं क्षं सोहं ळं सोहं हंसोहं सं इत्या
दि सोहं अं इति पर्यंतं विपरीतक्रमेण न्यसेत्॥ पुनः ह्रीं अं इत्यादि ह्रीं क्षं
पर्यंतं न्यसेदिति शक्तिमातृकान्यासः॥ पुनर्मूलमंत्रयुक्तां अं इत्यादि क्षं
पर्यंतं न्यसेत्॥ एतावत्कर्तुमसमर्थः श्चेत्समात्रकां शक्तिमातृकां मूलमंत्र
युक्तां मातृकां वा न्यसेत्॥ एवं मातृकान्यासान्विधाय प्रपंचयागं कुर्यात्॥
क तद्यथा॥ आदौ गणपतिमंत्रस्य गणो ऋषिर्निचृद्गायत्री छंदः श्रीमहाग
णपतिप्रसादसिध्यर्थे जपे विनियोगः॥ ॐ गां अंगुष्ठयोः श्रीं गीं तर्जन्योः॥
ह्रीं गूं मध्यमयोः॥ क्लीं गैं अनामिकयोः ग्लौं गौं कनिष्ठकयोः॥ गंगः क
रतलकरपृष्ठयोः॥ इत्यंगुलिन्यासं विधाय एभिरेव षडंगन्यासं कुर्या
त्॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा॥
इति गणपतिमंत्रः॥ ततो महागणपतिं सावरणं ध्यायेत्॥ मंदाराद्यैः
कल्पवृक्षविशेषैर्विशिष्टतरफलकैः॥ शिशिरितचतुराशैर्नवीनात
पचंद्रिकाकुले च तले॥ रक्षवज्रलनिधिलहरीकणआलवाहिनागंध
वहेन॥ संसेवितेचस्करतरुस्कमनः श्रितमधुपपक्षवलनपरे या॥ र
त्नमंडपे मणिवज्रवालफलपुष्पपल्लवस्य सरः॥ मदनोधस्ताद
तुभिर्युगपत्संसेवित [illegible] सिंहमुखपादपीठे कोडिपिमये

पद्मेत्रिषट्कोणोल्लसितो। आसीनस्त्वेकरदो रहृदुदरो दशभुजो रुणश्च
गजवदनः॥ बीजापूरगदेक्षुकार्मुकरुजा चक्राब्जपाशोत्पल ब्रीह्यग्र
९ स्वविषाणरत्नकलशप्रोद्यत्कराम्भोरुहः॥ ध्ये। यो वल्लभया सपद्मकरया ग
१ श्लिष्टोज्ज्वलद्भूषया विश्वोत्पत्तिविनाशसंस्थितिकरो विघ्नो विशिष्टार्थदः॥
करपुष्करधृतकलशस्रुतमणिमुक्ताप्रवालवर्षेण॥ अविरतधारां
विकिरन्नुपरितः साधकसमयसंपत्त्यै॥ मदजललोलुपमधुकरमा
लां निजकर्णतालतया निरसयन्मुहुर्मुहुरमरैर्नरैश्च सेवितो युगपत्॥
अग्येथ बिल्वमभितश्च रमारमेशौ तद्दक्षिणे वटयुषौ गिरिजावृषाङ्कौ॥
पश्चेथ पिप्पलजुषौ रतिपुष्पबाणौ सव्ये प्रियंगुमभितश्च महीवराहौ॥ ध्ये
यो वतो वक्रदरैः षुरोक्तौ पाशांकुशाख्य परशुत्रिशिरैरथान्यौ॥ यु
ग्मान्यलेक्षुमथ चापशरैस्तृतीया वंशौ शुकाक कलमाग्यगदारथाङ्गैः॥
ध्येया षट्कोणा। स्त्रिषु परितः पाशांकुशाभयेष्टकराः॥ मूषमदागपापत
यो रक्ताकाराः प्रभिन्नमदविवशाः॥ अयास्त्रावामोदप्रमोदसुमुखदु
र्मुखविघ्नविघ्नकर्त्तारः॥ स व्यापसव्यभागे तस्य ध्येयौ व शंखपद्मनि
धी॥ मौक्तिकमाणिक्याभौ वर्षन्तौ धारया धनानि सदा॥ सिद्धिसमृद्धि
कान्ति मदनावतीमदद्रवद्राविणि वसुधारा व्येव स्कम सपि
विघ्ननिधिप्रमदाः॥ ध्यात्वैवं द्विरदमुखं भवति नरः सर्वसंपदां निलयः॥ ९

इति ध्यात्वा महागणपतिमंत्रं अष्टधा जपेत्॥ततः अस्य श्री बीजगणपतिमं
त्रस्य गणक ऋषिर्निचृद्गायत्री छंदः॥श्री बीजगणपतिर्देवता बीजगण
पति प्रसादसिध्यर्थे जपे विनियोगः॥गां गीं गूं गैं गौं गः इत्या षडंगुलिन्यासं
विधाय षडंगन्यासं च विधाय॥रक्तो रक्तांगरागांशुक कुसुमयुतस्तुंदिल
श्चंद्रमौलिर्नेत्रैर्युक्तस्त्रिभिर्वामनकरचरणो बीजपूरात्तनासः॥हस्ता
ग्राक्लृप्तपाशांकुशरदवरदो नागवक्त्रोहिभूषो देवः॥पद्मासनो वो भ
वतु नतसुरो भूतये विघ्नराजः॥इति ध्यात्वा चतुश्चत्वारिंशद्वारं बीज
गणपतिमंत्रं जपेत्॥ततो गणानां त्वा गणपतिं वैदिकमंत्रं वार चतुष्ट
यं जपेत्॥पुनर्महागणपतिमंत्रं वार चतुष्टयं जप्त्वा षडंगपूर्वकं शुद्ध
मातृकान्यासं वारत्रयं कृत्वा ततो षोडश स्वरान् उच्चार्य आदित्याय नमः
इति मुखे न्यसेत्॥यं रं लं वं सोमाय नम इति दक्षिणकरतले। कं खं गं
घं ङं अंगारकाय नम वामकरतले। चं शुक्राय दक्षिणपादे। टं बुधाय
नमः। वामे॥तं बृहस्पतये नमः॥नाभौ। पं शनैश्चराय नमः हृदये॥
इति सप्तग्रहन्यासं विधाय। अस्य श्री आत्माष्टाक्षरमंत्रस्य ब्रह्मा ऋ
षिर्गायत्री छंदः स्वप्रकाश सच्चिदानंदाद्वियहः परमात्मा देवता आत्म
प्रत्ययार्थे विनियोगः॥ॐ ह्रीं अंकं ५ आं स्वाहा हृदयाय नमः॥ॐ ह्रीं
इं चं ५ ई सोहं शिरसे स्वाहा॥ॐ ह्रीं उं टं ऊं हंसः शिखायै वषट्॥ॐ

ह्रीं रं तं पं रैं ह्रीं कवचाय हुं ॥ ॐ ह्रीं ॐ पं पं औं ॐ नेत्रत्रयाय वौषट् ॥ ॐ
ह्रीं अं यं १० आ हरिहरअस्त्राय फट् इति षडंगं विधाय स्वात्मानं सक
३० लप्रपंचसाक्षिणं निरतिशयानंदचिद्घनस्वाविनाभूतं परिपूर्णमवि
१० कारं विचिंत्य स्वस्मिन्वर्णान् जुहुयात् ॥ ॐ ह्रीं क्षः हंसः सोहं स्वाहा ॥
ॐ ह्रीं ळः हंसः सोहं स्वाहा इत्यादि संहारक्रमेण ॐ ह्रीं अः हंसः सोहं
स्वाहेति पर्यंतं हुत्वा पुनः ॐ ह्रीं अं हंसः सोहं स्वाहा ॥ ॐ ह्रीं आः हंसः
सोहं स्वाहेत्यादि ॐ ह्रीं क्षः हंसः सोहं स्वाहेति पर्यंतं सृष्टिक्रमेण मातृ
कान्यासं कुर्यात् ॥ एवं प्रपंचयागं कृत्वा कृतकृत्यो भवति ॥ सर्वे मंत्रा
— स्फुरद्रूपा भवंति ॥ अग्निहोत्रादय एतद्योगस्य कोट्यंशेनापि न स
दृशाः ॥ एवं कुर्वन्नात्मयाजी प्रमुच्यते ॥ यत्रकुत्र शरीरत्यागे मुक्त एव
नात्र संशयः इति प्रपंचयागः ॥ एवं प्रपंचयागं विधाय पूर्ववत् षोढान्या
सं कुर्यात् ॥ अं विघ्नेश्वराय श्रियै नमः ॥ आं विघ्नराजाय श्रियै नमः ॥ इं वि
सौ नायकाय पुष्ट्यै नमः ॥ ईं शिवोत्तमाय शांत्यै नमः ॥ उं विघ्नकृते तुष्ट्यै
नमः ॥ ऊं विघ्नहर्त्रे सरस्वत्यै नमः ॥ ऋं गणनायकाय रत्यै नमः ॥ ॠं
एकदंताय मेधायै नमः ॥ लृं द्विदंताय कांत्यै नमः ॥ ॡं गजनायकाय कामिका
न्यै नमः ॥ एं निरंजनाय मोहिन्यै नमः ॥ ऐं कपर्दिने जटायै नमः ॥ ॐ १०
दीर्घमुखाय श्रीजायै नमः ॥ औं शंकुकर्णाय ज्वालिन्यै नमः ॥ अं व

षभध्वजाय नं दायै नमः। अः गणनाथाय तु यशसे नमः॥ कं गजेंद्राय का
मरूपिण्यै नमः। खं शूर्पकर्णाय उग्रायै नमः। गं त्रिलोचनाय तेजोवत्यै नमः
घं लंबोदराय सत्यायै नमः। ङं महानंदाय विघ्ननाशिन्यै नमः॥ चं चतुर्मू
र्तये स्वरूपायै नमः। छं सदाशिवाय कामार्त्यै नमः। जं आमोदाय मदविह्व
लायै। झं दुर्मुखाय विकटायै। ञं सुमुखाय घूर्णिताननायै। टं प्रमोदा
य भूत्यै नमः। ठं एकपादाय भूम्यै नमः। डं द्विजिह्वाय सत्यायै। ढं शू
राय सत्यै। णं वीराय मानुष्यै। तं षण्मुखाय मकरध्वजायै। थं वरदाय विक
वा र्णायै। दं वामदेवाय भ्रुकुट्यै। धं वक्रतुंडाय लज्जायै। नं द्विरंडाय
दीर्घघोणायै। पं सेनान्ये धनुर्धरायै। फं ग्रामण्ये कामिन्यै नमः।
बं मत्ताय रत्यै। भं विमत्ताय चंद्रकान्त्यै। मं मत्तवाहनाय शशिप्रभा
यै। यं जटिने लोचनायै। रं मुंडिने चपलायै। लं खड्गिने ऋध्यै। वं
वरेण्याय दुर्भगायै। शं वृषकेतनाय सुभगायै। षं भक्षप्रियाय सुर
संगणे तायै। क्षं गणेश्वराय कालजिह्वायै। इति मातृकास्थानेषु न्यसे
शाय दु त्॥ अथ ग्रहन्यासः। अं १६ आदित्याय नमः हृदये ॥ यं रं लं वं सो
र्गायै न माय नमः। भ्रूमध्ये॥ कं ५ अंगारकाय नमः नेत्रयोः॥ तं ५ शुक्राय
मः
हं मेघ नमः कुक्षौ॥ दं बुधाय हृदये॥ तं ५ बृहस्पतये नमः कंठे॥ पं ५ श

नादाय दुर्गद्वीपायै नमः नं व्यापिन्यै सीवायै नमः

नैश्चराय नमः। नाभौ॥ शं षं सं हं राहवे मुखे॥ लं क्षं केतवे नमः गुदे॥
इति ग्रह न्यासः॥ अं आं अश्विन्यै नमः भाले॥ इं भरण्यै नमः दक्षिण
३३ नेत्रे॥ ईं उं ऊं कृत्तिकायै· वामनेत्रे। ऋं ॠं ऌं ॡं रोहिण्यै· दक्षिणक
॥ र्णे। एं मृगशीर्षाय। वामकर्णे। ऐं आर्द्रायै· दक्षिणनासारंध्रे। ओं
औं पुनर्वसुभ्यां· वामे। कं पुष्याय· कंठे। खं गं अश्लेषायै· दक्षिण
भुजे। घं ङं· मघायै· वामे। चं पूर्वाफाल्गुन्यै· दक्षिणकूर्परे। छं जं उ
त्तराफाल्गुन्यै· वामे। झं ञं हस्ताय दक्षिणमणिबंधे। टं ठं चित्रायै· वामे।
डं स्वात्यै· दक्षिणस्तने। ढं णं विशाखायै· वामस्तने। तं थं अनुराधायै·
नाभौ। दं धं ज्येष्ठायै· दक्षिणपार्श्वे। नं पं फं मूलाय· वामपार्श्वे। बं पू
र्वाषाढायै· दक्षिणोरौ। भं उत्तराषाढायै· वामोरौ। मं श्रवणाय दक्षि
णजानुनि। यं रं धनिष्ठायै वामजानुनि। लं शतताराकायै दक्षिण
जंघायां। वं शं पूर्वाभाद्रपदायै। वामजंघायां। षं सं उत्तराभाद्रपदायै
दक्षिणपादे। लं क्षं अं अः रेवत्यै नमः वामपादे। इति नक्षत्र न्यासः॥ अ
थ योगिनी न्यासः॥ डां डीं डूं डैं डौं डः डाकिनि मां रक्ष रक्ष मत्त्वं रक्ष
सर्वसत्त्ववशंकरि देवि आगच्छागच्छ इमां पूजां गृह्ण गृह्ण ह्रीं घोरे देवी
ह्रीं सः परमघोरे हूं घोररूपे उल्कास हैं महात्रिपुरसुंदरि देवि वर ११

दे विशे अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ॐ औं अं अः विशुद्धपीठस्थे विशु
द्धा डाकिनि विशुद्ध नाथ श्री पादुकां पूजयामि॥ इति कंठे स्थषोडश
दले विशुद्ध चक्रे मध्ये विन्यस्य परितस्तदावरण देवतान्यसेत्॥ अं अ
मृताये नमः॥ आं आकर्षिण्यै नमः॥ इं इन्द्राण्यै नमः॥ ईं ईशान्यै नमः॥ उं
उमायै नमः॥ ऊं ऊर्ध्वकेशिन्यै नमः॥ ऋं ऋधिद्धायै नमः॥ ॠं ॠपायै नमः॥
लृं लृकारायै नमः॥ लॄं लॄषायै नमः॥ एं एकपदायै। ऐं ऐश्वर्यात्मिका
यै। ॐ ॐकारिण्यै। औं औषधात्मिकायै। अं अंबिकायै। अः अक्षरा
त्मिकायै॥ इति आदिक्षिण्ये न्यसेत्॥ ततः रां रीं रूं रैं रौं रः राकिनि मां र
क्ष रक्ष मद्भक्तं रक्ष रक्ष सर्वसत्ववशंकरि देव्यागच्छागच्छ इमां पूजां गृ
ह्ण गृह्ण ह्रीं घोरदेवि ह्रीं सः परमघोरे हूं घोररूपे उरलकसहैं महात्रिपु
रसुंदरि देवि वरदेवि वें कं खं गं घं ङं चं छं जं झं ञं टं ठं अनाहतपीठस्थ
अनाहतराकिनि अनाहतनाथ श्री पादुकां पूजयामि॥ इति हृदयस्थ
द्वादशदलानाहत चक्रमध्ये विन्यस्य परितः परिवार देवता विन्यसेत्॥
कं कालरात्र्यै। खं खंखातीनायै। गं गायत्र्यै। घं घंटाधारिण्यै। ङं ङं अर्णायै।
चं चंडोयै। छं छायायै। जं जपायै। झं झंकारिण्यै॥ ञं ज्ञानरूपिण्यै। टं
टंकहस्तायै। ठं ठंकारिण्यै इति वर्णदेवताः पूर्वादिषु क्रमेण प्राद
क्षिण्येन न्यसेत्॥ ततः लां लीं लूं लैं लौं लः लाकिनि मां रक्ष मांस

रक्षरक्षसर्वसत्ववशंकरि देव्यागच्छागच्छ इमां पूजां गृह्ण गृह्ण ह्रीं घोरदे
वि ह्रीं सः परमघोरे हूं घोररूपे डरलकसहैं महात्रिपुरसुंदरि देवि वरदे
१२ विच्चे डं ढं णं तं थं दं धं नं पं फं मणिपुरपीठस्थे मणिपुरलाकिनि मणिपु
रनाथश्री पादुकां पूजयामि इति मणिपुरचक्रे दशदलपद्मे विन्यस
१४ परितः परिवारदेवता न्यसेत् ॥ डं डामर्यै ॥ ढं ढंकारिण्यै । णं णार्कि
८ न्यै । तं तामस्यै । थं स्थाण्व्यै । दं दाक्षायै । धं धात्र्यै । नं नंदायै । पं पार्वत्यै ।
फं फट्कारिण्यै । इति दशवर्णदेवताः पूर्वादिक्रमेण न्यसेत् ॥ ततः कां
कीं कूं कैं कौं कः काकिनि मां रक्षरक्ष ममेदो रक्षरक्ष सर्वसत्ववशंकरि
देवि आगच्छागच्छ मां पूजां गृह्ण गृह्ण ह्रीं घोरदेवि ह्रीं सः परघोरे हूं घोर
रूपे डरलकसहैं महात्रिपुरसुंदरी देवि च्चे वं भं यं रं लं स्वाधिष्ठान
पीठस्थे काकिनि स्वधिष्ठाननाथश्री पादुकां पूजयामि ॥ इति मध्ये वि
न्यस्य परितो वर्णदेवता न्यसेत् ॥ वं वंधिन्यै नमः ॥ भं भद्रकाल्यै । मं
महामायायै । यं यशस्विन्यै । रं रमायै । लं लंबोष्ठ्यै । इति स्वाधिष्ठान
चक्रे षड्दले । ततः सां सीं सूं सैं सौं सः शाकिनि मां रक्षरक्ष ममास्थि
रक्षरक्ष सर्वसत्ववशंकरि देव्यागच्छागच्छ इमां पूजां गृह्ण गृह्ण ह्रीं ग
घोरदेवि ह्रीं सः परमघोरे हूं घोरस्वरूपे डरलकसहैं महात्रिपुर १२
सुंदरी देवि वरदे विच्चे वं शं षं सं मूलाधारे पीठस्थे मूलाधारशा

किनिमूलाधारशाकिनि मूलाधारनाथश्रीपादुकां पूजयामि इति मूलाधा
रचक्रे चतुर्दलमध्ये विन्यस्य परितो वर्णदेवता न्यसेत्।। वं वरदायै नमः।। शं
श्रियै। षं षंडदायै। सं सरस्वत्यै। इति मूलाधारचक्रे। हां ह्रीं हूं हैं हौं हः हा
किनि मां रक्ष रक्ष मज्जां रक्ष रक्ष सर्वसत्ववशंकरि देव्या गच्छागच्छ इ
मां पूजां गृह्ण गृह्ण ह्रीं घोरदेवि ह्रीं सः परमघोरे हूं घोररूपे डरलकसहैं महा
त्रिपुरसुंदरी देवि वरदे विच्चे हूं क्षं आज्ञापीठस्थे आज्ञा हाकिनि आज्ञानाथ
श्रीपादुकां पूजयामि इत्याज्ञाचक्रे द्विदलमध्ये विन्यस्य परितो वर्णदेव
ता न्यसेत्।। हं हंसवत्यै। क्षं क्षमावत्यै। ततः यां यीं यूं यैं यौं यः याकिनि
मां रक्ष रक्ष मज्जं रक्ष रक्ष सर्वसत्ववशंकरि देव्य। गच्छागच्छ इमां पूजां
गृह्ण गृह्ण ह्रीं घोरदेवि ह्रीं सः परघोरे हूं घोररूपे डरलवसहैं महात्रिपु
रसुंदरि देवि वरदे विच्चे अं आं इत्यादि क्षं पर्यंतं एकपंचाशद्वर्णानुच्चा
र्य ब्रह्मरंध्रपीठस्थे ब्रह्मरंध्र याकिनि ब्रह्मरंध्रनाथश्रीपादुकां पूजया
मि इति शिरसि सहस्रदलमध्ये विन्यस्य परितो मृतादि क्षमावतीप
र्यंता एकपंचाशद्वर्णा देवता न्यसेत्।। इति योगिनीन्यासः।। अथ रा
शिन्यासः।। अं आं इं ईं मेषाय नमः। दक्षिणपादतले। उं ऊं ऋं वृषाय
नमः। दक्षिणमुष्के। ॠं लृं ॡं मिथुनाय नमः दक्षिणपार्श्वे।। एं ऐं कर्की

यनमः दक्षिणपार्श्वे। ॐ औं सिंहाय नमः दक्षिणभुजे। अं अः शं षं सं हं
लं क्षं कन्यायै शिरो दक्षिणभागे। कं ५ तुलायै नमः शिरो वामभागे। चं ५
१२ वृश्चिकाय नमः वामभुजे। टं ५ धनुषे नमः वामपार्श्वे। तं ५ मकराय नमः
कट्यां। पं ५ कुंभाय नमः क वाममुष्के। यं रं लं वं मीनाय नमः वामपादतले। इ
13 ति राशिन्यासः॥ अथ पीठन्यासः। ॐ कामरूपपीठाय नमः। आं वाराण
सीपीठाय नमः। इं नैपालपीठाय नमः। ईं पौंड्रवर्धनपीठाय नमः। उं परस्थि
रपीठाय नमः। ऊं कन्याकुब्जपीठाय नमः। ऋं पूर्णगिरिपीठाय नमः। ॠं
अर्बुदपीठाय नमः। लृं आम्रातकेश्वरपीठाय नमः। ॡं एकाम्रपीठाय न
मः। एं त्रिःस्रोतःपीठाय नमः। ऐं कामकोट्टपीठाय नमः। ॐ कैलासपीठा
य नमः। औं भृगुपुरीपीठाय नमः। ॐ केदारपीठाय नमः। अं चंद्रपुरपी
ठाय नमः। कं श्रीपुरपीठाय नमः। खं एकपादपीठाय नमः। गं जालंधरपी
व ठाय नमः। घं मालवपीठाय नमः। ङं कूलूरपीठाय नमः। चं देविकोट्टपीठ
य नमः। छं गोकर्णपीठाय नमः। जं मारुतेश्वरपीठाय नमः। झं कां। चीपुर
पीठाय नमः। ञं विरजापीठाय नमः। टं राजगृहपीठाय नमः। ठं महापथ
पीठाय नमः। डं कोल्लागिरिपीठाय नमः। ढं एलापुरपीठाय नमः। णं
ॐकारपुरपीठाय नमः। तं जयंतिकापुरपीठाय नमः। थं उज्जयिनिपुर १२
पीठाय नमः। दं चरित्रापुरपीठाय नमः॥ धं क्षीरकपुरपीठाय नमः

नं हस्तिनापुरपीठायनमः। पं उड्डीशपुरीपीठायनमः॥ फं प्रयागपुरपीठ
यनमः॥ वं षष्ठपुरपीठायनमः॥ भं मायापुरपीठायनमः॥ मं जलेश्वरपी
ठायनमः॥ यं म [illegible] यगिरिपीठायनमः॥ नं श्रीशैलपुरपीठायनमः॥ लं
मेरुगिरीपीठायनमः॥ वं गिरिवरपीठायनमः॥ शं महेंद्रपुरपीठायनमः॥
षं वामनपुरपीठायनमः॥ सं हिरण्यपुरपीठायनमः॥ हं महालक्ष्मीपु
रपीठायनमः॥ लं उड्याणपुरपीठायनमः॥ क्षं छायापुरपीठायनमः॥
इतिमातृकान्यासक्रमेण न्यसेत्॥ इतिपीठन्यासः॥ सर्वोत्तमोत्त
मः॥ एषन्यासकर्त्ता साक्षात्परदेवतारूपो नम्रा कृतः॥ षोढान्यासं
विधाय यत्र यत्र गच्छति तत्र तत्र सकलकार्यसिद्धिः॥ राजादयो व
श्यं भवंति॥ क्रुद्धः सन् यं प्रणमेत् स अचिरादेव यमवशो भवति॥ षो
ढान्यासविहीनं यं प्रणमति तस्यायुःक्षयो भवति॥ किं बहुनास्य
वसर्ववंद्यः न कोपि तस्य वंद्यः॥ मातापितृपूज्यानामपि देवताबु
द्ध्या प्रणामं कुर्यात्॥ न तु मनुष्यबुध्या॥ इतिषोढान्यासं विधाय श्री
चक्रन्यासं कुर्यात्॥ त्रैलोक्यमोहनचक्रायनमः॥ बाह्यचतुरस्रेरेखा
यनमः॥ व्यापकं विधाय अणिमासिध्यैनमः॥ दक्षिणांसपृष्ठे॥ ल
घिमासिध्यै [illegible] दक्षिणपराप्रग्रे॥ महिमासिध्यैनमः॥ दक्षिणस्फि
जि॥ ईशित्वसिध्यैनमः॥

दक्षिणपादाग्रे। वशित्वसिद्ध्यै नमः॥ वामपादाग्रे। प्राकाम्यसिद्ध्यै वा
मस्फिजि॥ भुक्तिसिद्ध्यै वाम पाण्याग्रे। इच्छासिद्ध्यै वामांसपृष्ठे।
१४ प्राप्तिसिद्ध्यै शिरःपृष्ठभागे। मोक्षसिद्ध्यै पृष्ठे। ततो मध्य चतुरस्र
रेखायै नमः॥ इति व्यापकं कुर्यात्। आं ब्राह्म्यै नमः पादांगुष्ठद्वये।
15 ईं माहेश्वर्यै नमः दक्षिणपार्श्वे। ऊं कौमार्यै मूर्धनि। ऋं वैष्णव्यै वामपा
र्श्वे। ऌं वाराह्यै वामजानुनि। ऐं इंद्राण्यै दक्षिणजानुनि। औं चामुंडायै पा
दक्षिणांसे। अः महालक्ष्म्यै वामांसे। ततः अंतश्चतुरस्ररेखायै नम
इति व्यापकं कुर्यात्। द्रां सर्वसंक्षोभिण्यै मुद्रायै नमः॥ पादांगुष्ठद्वये। द्रीं द्व
सर्वविद्राविण्यै दक्षिणपार्श्वे। क्लीं सर्वाकर्षिण्यै मुद्रायै मूर्धनि। ब्लूं सर्वा
वेशकर्यै मुद्रायै वामपार्श्वे। सः सर्वोन्मादिन्यै मुद्रायै वामजानुनि
क्रौं महांकुशामुद्रायै दक्षिणजानुनि। हस्खफ्रें सर्वखेचरीमुद्रायै
दक्षिणांसे। हैं इं क्लीं ह्सौः सर्वत्रिखंडमुद्रायै वामांसे। ह्सौः सर्व
बीजमुद्रायै नमः। द्वादशांते। ऐं सर्वासन्निकय्यै महायोनिमुद्रायै
पादांगुष्ठद्वये॥ इति व्यापकं विन्यस्य अं आं सौः त्रिपुराकचक्रे १४
श्वर्यै स्वाहा॥ इति व्यापकं विधाय एताः प्रकटयोगिन्यः त्रैलोक्य
मोहनचक्रे सचक्राः समंत्राः ससिद्धयः सायुधाः सपरिवाराः
न्यस्ताः। संतु नमः इति व्यापकं कुर्यात्॥ इति प्रथमावरणं॥ ततः

सर्वाशापरिपूरकचक्रायनमः इति व्यापकं विधाय षोडशदलपद्माय
नमः इति व्यापकं कुर्यात्॥ अं कामाकर्षिण्यै नित्याकलायै दक्षिणक
र्णपृष्ठे। आं बुद्ध्याकर्षिण्यै नित्याकलायै दक्षिणांसे। इं अहंकाराक
र्षिण्यै नित्याकलायै दक्षिणकूर्परे। ईं शब्दाकर्षिण्यै नित्याकलायै
दक्षिणकरपृष्ठे। उं स्पर्शाकर्षिण्यै नित्याकलायै दक्षिणोरौ। ऊं रू
पाकर्षिण्यै नित्याकलायै दक्षिणजानुनि॥ ऋं रसाकर्षिण्यै नित्याक
लायै दक्षिणगुल्फे। ॠं गंधाकर्षिण्यै नित्याकलायै पादतले। लृं चि
त्ताकर्षिण्यै नित्याकलायै वामपादतले। लॄं धैर्याकर्षिण्यै नित्याकला
यै वामगुल्फे। एं स्मृत्याकर्षिण्यै नित्याकलायै वामजानुनि। ऐं नामाक
र्षिण्यै नित्याकलायै वामोरौ। ओं बीजाकर्षिण्यै नित्याकलायै वामकर
पृष्ठे। औं आत्माकर्षिण्यै नित्याकलायै वामकूर्परे। अं अमृताकर्षिण्यै
नित्याकलायै वामांसे। अः शरीराकर्षिण्यै नित्याकलायै वामकर्णपृ
ष्ठे। ऐं क्लीं सौः त्रिपुरेश्वरी चक्रेश्वर्यै नमो हृदये। तस्या दक्षिणभागे ल
घिमासिद्ध्यै नमः वामे मे। द्रीं द्रां विपी मुद्रायै नमः इति विन्यस्य ऐं क्लीं
सौः त्रिपुरेश्वर्यै चक्रेश्वर्यै देव्यै स्वाहेति व्याप्य एताः गुप्तयोगिन्यः
सर्वाशापरिपूरके चक्रे समुद्राः ससिद्धयः सायुधाः सवाहनाः स
परिवारा न्यस्ताः संतु नमः इति व्यापकं कुर्यात्॥ इति द्वितीयावर

णन्यासः। ह्रीं क्लीं सौः ततः सर्वसंक्षोभणचक्रायनमः। अष्टदलपद्मायन
मः। इति व्याप्यकं ५ अनंगकुसुमायैनमः इति दक्षिणशंखे। खं ५ अ
१५ नंगमेखलायै दक्षिणजत्रुणि। टं ५ अनंगमदनायै दक्षिणोर्वन्ते। तं
15 अनंगमदनातुरायै दक्षिणगुल्फे। पं ५ अनंगरेखायै वामगुल्फे। यंरंलं
वं अनंगवेगिन्यै वामोरौ। शंषंसंहं अनंगांकुशायै वामजत्रुणि॥ लंक्षं
अनंगमालिन्यै वामशंखे। इति विन्यस्य ह्रीं क्लीं सौः त्रिपुरात्रिपुरसुंद
र्यै देव्यै चक्रेश्वर्यै स्वाहा इति व्याप्य एता गुप्ततरयोगिन्यः सर्वसंक्षोभणच
क्रे समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः न्यस्ताः संतु
नम इति व्यापकं कुर्यात्॥ इति तृतीयावरणन्यासः॥ हैं ह्क्लीं ह्सौः सर्वसौ
भाग्यदायकचक्रायनम इति व्याप्य चतुर्दशारचक्रायनम इति व्या
पकं कुर्यात्॥ टं सर्वसंक्षोभिण्यै नमः ललाटदक्षिणभागे। ठं सर्ववि
द्राविण्यै दक्षिणगंडे। डं सर्वाकर्षिण्यै दक्षिणांसमध्ये। ढं सर्वाह्लादि
न्यै दक्षिणपार्श्वान्ते। णं सर्वसंमोहिन्यै दक्षिणोर्वन्ते। तं सर्वस्तंभिन्यै द
क्षिणजंघांते। थं सर्वजृंभिन्यै वामजंघांते। दं सर्ववशंकर्यै वामोर्वंते।
धं सर्वरंजिन्यै वामपार्श्वांते। नं सर्वोन्मादिन्यै वामांसमध्ये। पं सर्वार्थ
साधिन्यै वामांगंडे। फं सर्वाशापरिपूरिण्यै ललाटवामभागे। बं सर्व १५
मंत्रमय्यै ललाटमध्ये। भं सर्वद्वंद्वक्षयंकर्यै ललाट पृष्ठभागे। इति वि

न्यस्य हैं ह्क्लीं ह्सौः त्रिपुरावासिन्यै चक्रेश्वर्यै देव्यै स्वाहा इति व्याप्य एना। संप्रदाययोगिन्यः सर्वसौभाग्यदायके चक्रे समुद्रा इत्यादिना व्यापकं कुर्यात्। ततः सर्वार्थसाधकचक्राय नमः। बाह्यदशार चक्राय नमः इति व्यापकं सर्वसिद्धिप्रदायै दक्षिणनेत्रे। खं सर्वसंपत्प्रदायै नासामूले। गं सर्वप्रियंकर्यै वामनेत्रे। घं सर्वमंगलकारिण्यै कुक्षेरीशान कोणे॥ रं सर्वकामप्रदायै कुक्ष वायुकोणे। चं सर्वदुःखविमोचिन्यै वामजानुनि। छं सर्वमृत्युप्रशमन्यै दक्षिण जानुनि। जं सर्वविघ्ननिवारिण्यै गुदे। झं सर्वांगसुंदर्यै कुक्षिनैरृत्यकोणे। ञं सर्वसौभाग्यदायिन्यै कुक्षि वह्नि कोणे। इति विन्यस्य हैं ह्क्लीं ह्सौः त्रिपुराश्री चक्रेश्वर्यै देव्यै स्वाहेति व्याप्य एताः कुलकौलियोगिन्यः सर्वार्थसाधके चक्रे समुद्रा इत्यादि पूर्ववद्व्यापकं कुर्यात्॥ ततः सर्वरक्षाकरचक्राय नमः। अंतर्दशार चक्रासनाय नमः॥ इति व्याप्य यं सर्वज्ञायै दक्षिणनासारंध्रे रं सर्वशक्त्यै दक्षिणस्फिक्पि। लं सर्वैश्वर्यप्रदायै दक्षिणस्तने। वं सर्वज्ञानमय्यै दक्षिणमुष्के। शं सर्वव्याधिविनाशिन्यै सीवन्यां॥ षं सर्वाधारस्वरूपिण्यै वाममुष्के सं सर्वपापहरा देवि वामस्तने। हं सर्वानंदमयै वामस्फिक्पि॥ लं सर्वरक्षाकार्यै नासारंध्रे। क्षं सर्वेप्सितप्रदायै नासाग्रे। इति विन्यस्य ह्रीं क्लीं क्लें त्रिपुरामालिन्यै चक्रेश्वर्यै स्वा

हेति व्याप्य एतानि गर्भयोगिन्यः सर्वरक्षाकरे चक्रे समुद्राद्यादि पूर्ववत्
श्री व्यापकं कुर्यात्। ततः सर्वरोगहरचक्राय नमः॥ इति व्यापकं विधाय ऐं
ह्रीं श्रीं अं १६ ब्लूं वशिनी वाग्देवतायै नमः चिबुक दक्षिणभागे। कं ५ कल ह्रीं
१६ कामेश्वर्यै वाग्देवतायै कंठ दक्षिणभागे। चं ५ न्क्लीं मोदिनी वाग्देवतायै हृ
16 दय दक्षिणभागे। टं ब्लूं विमला वाग्देवतायै नाभे दक्षिणभागे। तं ५ ज्म्रीं अरु
णा वाग्देवतायै म ठरे त्तरभागे। पं ५ ह्स्लीं जयिनी वाग्देवतायै हृदय कोत्त
रभागे॥ यं रं लं वं सर्वेश्वर्यै वाग्देवतायै कंठो त्तरभागे। शं षं सं हं लं क्षं
क्ष्म्रीं कौलिनी वाग्देवतायै चिबुको त्तरभागे। एवं विन्यस्य श्रीं ह्रीं सौः त्रिपुरा
सिद्धाचक्रेश्वर्यै देव्यै स्वाहा॥ इति व्याप्य एतारहस्य योगिन्यः सर्वरोग
हरे चक्रे समुद्रा इत्यादि पूर्ववत्। ततः अष्टकोण त्रिकोणमध्य देवताभ्यो
स्यो नम इति व्यापकं विधाय हृदये त्रिकोणं विचिंत्य तस्य चतुर्दिक्षु आ
युध देवता विन्यसेत्। ऐं ह्रीं श्रीं ऐं द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां सां जं जंभ
नेभ्यः कामेश्वर वाणेभ्यो नमः। ऐं ह्रीं श्रीं यां रां लां शों सां ऐं द्रां द्रीं क्लूं ब्लूं ब्लूं।
सः जं जंभनेभ्यः कामेश्वरी वाणेभ्यो नमः इति हृदय त्रीकोणस्य पश्चि
मभागे न्यसेत्। ऐं ह्रीं श्रीं थं मोहनाय कामेश्वर चापाय नमः ऐं
ह्रीं श्रीं थं मोहनाय कामेश्वरी चापाय नमः। त्रिकोणे [illegible] त्तरे। ऐं ह्रीं श्रीं
आं आकर्षणाय कामेश्वर पाशाय नमः। ऐं ह्रीं श्रीं आं आकर्षणाय का १६

कामेश्वरीपाशायनमः ॥ त्रिकोणपूर्वभागे। ऐं ह्रीं श्रीं क्रों स्तंभनाय कामेश्व
रांकुशायनमः। ऐं ह्रीं श्रीं क्रों स्तंभनाय कामेश्वर्यंकुशायनमः त्रिकोण दक्षि
णे। ततः सर्वसिद्धिप्रदचक्रायनमः॥ अंतस्त्रिकोणाय नम इति व्यापकं
विधाय॥ ऐं ह्रीं श्रीं प्रथमकूटमुच्चार्याग्निचक्रे कामगिरिपीठे मित्रेशना
थात्मिके कामेश्वरीदेवि रूद्रात्मकशक्ति श्रीपादुकां पूजयामि॥ इति त्रि
कोणाग्रे॥ ऐं ह्रीं श्रीं द्वितीयकूटमुच्चार्य सूर्यचक्रे जालंधरपीठे षष्ठीश
स्या नाथात्मिके वज्रेश्वरीदेवि विष्ण्वात्मशक्ति श्रीपादुकांपूजयामि॥ इति त्रि
कोणस्याग्नेयकोणे॥ ऐं ह्रीं श्रीं तृतीयकूटमुच्चार्य सोमचक्रे पूर्णगिरि
पीठे उड्डीशनाथात्मिके॥ भगमालिनीदेवि ब्रह्मात्मकशक्ति श्रीपादु
कां पूजयामीति त्रिकोणे शानकोणे॥ ह्स्रैं ह्स्क्लीं ह्स्रौः त्रिपुरांबाचक्रे
ह श्वर्यै देव्यै स्वाहेति व्याप्य ततः अतिरहस्ययोगिन्यः सर्वसिद्धिप्रदचक्रे
समुद्रा इत्यादि पूर्ववत् हसकलरडैं हसकलरडीं हसकलरडौः त्रिपु
रभैरवीचक्रेश्वरी श्रीपादु०। एताः परापररहस्ययोगिन्यः सर्वानंदमयम
हाचक्रायनमः॥ वैं दवे नमः इति व्याप्य मूलविद्यां समस्तामुच्चार्य ब्र
ह्मचक्रे ॐ ड्याणपीठे चर्यानंदनाथात्मिके परब्रह्मात्मशक्ति महात्रि
सुंदर पुरदेवि श्रीपादुकां पूजयामीति हृदये त्रिकोणमध्ये बिंदु विचिंत्य न्य
सेत्॥ ततः पंचदशनित्या। सायेस ध्योक्ताः त्रिकोणांतर्दक्षिणादू

न्य

वीतरस्वा सुपं चपं चविन्यस्य : षोडशीम हात्रिपुरसुंदरी मध्यविंदौ वि
न्यसेत्।। इति नवुः शास्त्रादिमतं। तंत्रराजमते विंदावेव न्यसेत्।। कामेश्व
(१) र्यौः चित्रांताः त्रिकोणाभागे रेखा वहिर्गुरुपंक्ति विन्यसेत् परमाशिवना
थश्रीपादुकां पूजयामि।। पराशक्त्यंबाश्रीपादुकां पू० कामेश्वर्यंबाश्री
17 पादुकां० वज्रेश्वर्यंबाश्रीपादुकां० भगमालिन्यंबाश्रीपादु० लोपामुद्रां
बाश्रीपादु० अगस्त्यानंदनाथश्रीपादुकां पूजयामीति सप्त दिव्यौघाः
कंकलानंदनाथश्रीपादुकां० धर्माचार्यनंदनाथश्रीपादुकां० मुक्त
केशिन्यंबाश्रीपादुकां० दीपकानंदनाथश्रीपादुकां पूजयामीति चत्वा
रः सिद्धौघाः जिष्णुदेवानंदनाथश्रीपादुकां० मातृगुप्तानंदनाथश्री
पादुकां० तेजोदेवानंदनाथश्रीपादुकां० नोजानंदनाथश्रीपादुकां० म
नोजवानंदनाथश्रीपादु० कामानंदनाथश्रीपादुकां० आह्लानंदनाथ
श्रीपादु० परानंदनाथश्रीपादुकां० इत्यष्टौ मानवौघाः।। अथ स्वगुरुप
रंपरा।। माहेश्वरानंदनाथश्रीपा० संविदंबाश्रीपा० अविंत्यानंदनाथ
श्रीपा० संविदंबाश्रीपा० रामानंदनाथश्रीपा० संविदंबाश्रीपा० ज्ञा
नानंदनाथश्रीपादु० संविदंबाश्रीपा० कामानंदनाथश्रीपा० संविदंबा (८)
श्रीपा० आनंदनाथश्रीपा० संविदंबाश्रीपादु० इति विन्यस्य पूर्वाभि
षेकानंतरं गुरुनादत्तं स्वनाममूलाधारे न्यसेत्।। इति संहारक्र

क मवर्णन्यासः॥ अथसृष्टिक्रमचक्रन्यासः॥ शिरसित्रिकोणं विचिंत्य
मध्येसर्वानंदमयमहाचक्रायनमः इतिव्याप्य। बिंदुंविभाव्यसमस्तावि‍द्या
गुर्वार्यब्रह्मचक्रे ॐ आ० पीठेइत्यादिमहात्रिपुरसुंदरीश्रीपादु० इतिम
ध्येन्यसेत्॥ ततः षोडशनित्याः स्वायंसंध्योक्ताः मातृकास्वरस्थानेषु
न्यसेत्॥ परमशिवा नाथादिगुरुपङ्क्तीः शिरः पूर्वभागेविन्यस्य स्वनामम्
लाधारेन्यसेत॥ ततः श्री अंसस्त्रिकोणायनमः सर्वसिद्धिप्रदचक्राय
नमः॥ इति व्यापकं विधाय। शिरसित्रिकोणस्यपश्चिमकोणे पूर्वोक्तांका
मेश्वरीं न्यसेत्॥ आग्नेयेकोणेवज्रेश्वरीं ऐशानकोणे भगमालिनीं न्य
सेत्॥ पूर्वोक्तमंत्रैरेव॥ ततः अष्टकोणत्रिकोणमध्यदेवताभ्योनमः
२ ऐं द्रां द्रीं क्लीं ब्लूं सः यांरांलांवांसांजंजं नाभ्योनमः कामेश्वरबाणेभ्योन
मः॥ दक्षिणनेत्रे। ऐं ह्रीं श्रीं यांरांलांवांसां ऐं द्रां द्रीं क्लीं ब्लूं साजंजंभने
भ्योनमः कामेश्वरीबाणेभ्योनमः॥ वामनेत्रे। थंमोहनाय कामेश्वर चा
पाय नमः दक्षिणभुवि। २ थंमोहनायक कामेश्वरीचापायनमः वामभु
वि॥ आं आकर्षणाय कामेश्वरपाशाय दक्षिणकर्णे ह्रीं आकर्षणाय
कामेश्वरीपाशायनमः वामे॥ ३ क्रों स्तंभनाय कामेश्वरांकुशायनमः
दक्षिणनासाग्रे ३ क्रों स्तंभनायकामेश्वर्यंकुशाय नासाग्रवामे। सर्व
रोगहरचक्रायनमः अष्टारचक्रायनमः इतिव्याप्य शिरसिमुंडमाला
चक्रक्रमेण पूर्वादितः प्रादक्षिण्येन वाग्देवताष्टकं वशिन्याष्टकं न्यसे

तू॥ सर्वरक्षाकर चक्राय नमः॥ अंतर्दशार चक्राय नमः। इति व्याप्य
सर्वः ज्ञादिदशक्ति नेत्रे मूले आपांगे कर्णमध्ये कर्णपृष्ठे चूलिकानि
१८ म्नस्थ च दक्षिणेन स्यो त्तरे वामकर्णपृष्ठे कर्णमध्ये वामनेत्रापांगे तस्यै
वमूले च क्रमेण न्यसेत्॥ ततः सर्वार्थ कच चक्राय नमः॥ बाह्यदशार चक्रा
१४ यनमः। इति व्याप्य सर्वसिद्धिप्रदादि दशशक्तिः कंठस्थ षोडश दलेवि
शुद्धिचक्रे पूर्वादितः एकस्मिन्नेकस्मिन्द्वये द्वितीय द्वितीय क्रमे
ण प्रादक्षिण्येन न्यसेत्॥ सर्वसौभाग्य दायक चक्राय नमः इति व्याप्य
हृदयस्थानाहतचक्रे द्वादशादले सर्वसंक्षोभिण्यादि चतुर्दश शक्तीः
पूर्वादि दशदलेषु विन्यस्य रकादशो [illegible] ले द्वादशदले च शक्ति
द्वंद्वं न्यसेत्॥ सर्वसंक्षोभक चक्राय नमः अष्टारपद्माय नमः इति व्या
प्य नाभिस्थ मणिपूरक चक्रे दशदले पूर्वादि षड्दलेषु अनंगकुसु
मादि षट् शक्ति विन्यस्य अनंगांकुशानंग गामिनी च दलद्वय दलद्व
ये न्यसेत्॥ सर्वाशापरिपूरक चक्राय नमः। षोडशदलपद्माय नमः इ
ति व्याप्य स्वाधिष्ठानस्य षड्दले चक्रे कामाकर्षिण्यादि षोडश शक्तीः
पूर्वादितः शक्तिः त्रयं त्रयं विन्यस्य षष्ठे दले षोडशीं शरीराकर्षिणी
न्यसेत्॥ त्रैलोक्य संमोहन चक्राय चक्राय नमः॥ अंतश्चतुरस्त्ररेखा
यै नमः॥ इति व्याप्य मूलाधार चतुर्दले पूर्वादितो मुद्रा द्वयं मुद्राद्व १८
यं विन्यस्य दक्षिण दलस्य निर्ऋति भागे बीजमुद्रां उत्तर दलस्य इ

शान भागे योनिमुद्रां न्यसेत्॥ ततश्चतुरस्रे रेखायै। नम इति व्याप्य दक्षि
जंघायाः पश्चिमादि चतुर्दिक्षु वाय्वादि चतुः कोणेषु ब्राह्म्यादि वमा
दक्षिण्येन न्यसेत्॥ ततो बाह्य चतुरस्र रेखायै नम इति व्याप्य वामजंघायाः
पश्चिमादि चतुर्दिक्षु वाय्वादि चतुः कोणेषु अणिमादि सिद्धीर्विन्यस्य
प्राप्ति सिद्धिं वामपादतले मोक्षसिद्धिं दक्षिणे न्यसेत्॥ ऐं आं सौः त्रिपुरा
कला चक्रेश्वर्यै स्वाहा इति व्याप्य एताः प्रकटयोगिन्य इत्यादि व्यापकं कुर्या
त्॥ सर्वत्र प्रतिचक्रं तत्तच्चक्रेश्वर्यास्तः स्वमर्पणमंत्रेण व्यापकं कुर्यात्॥
— संहारचक्रन्यासवदत्रापि॥ इति तु सृष्टिचक्रन्यासः॥ अथ स्थितिक्रम
चक्रन्यासः॥ ऐं आं सौः इति करशुद्धिं कुर्यात्॥ वाग्भवकूटं मूर्ध्नि: काम
राजं गुह्ये। शक्तिः कूटं हृदये। वाग्भवं दक्षिण नेत्रे। कामराजं भालने
त्रे। वाग्भवं दक्षिणकर्णे। कामराजं वामकर्णे। शक्तिं मुखे। वाग्भवं
दक्षिणभुजे। कामराजं वामे। शक्तिं पृष्ठे। वाग्भवं दक्षिणजानुनि
कामराजं वामे। शक्तिं नाभौ विन्यसः सतः ऐं आं सौः इति करशु
द्धिं कुर्यात्॥ ततः ऐं आं सौः पादयोः ऐं क्लीं सौः जंघयोः ह्रीं क्लीं सौः जा
नुनोः॥ हैं क्लीं ह्सौः इति ऊर्वोः। ह्सैः ह क्लीं ह्सौः स्फिजौः॥ ह्रीं क्लीं ब्लें लिंगे
श्रीं ह्रीं सौः मूलाधारे। ह्सैं ह क्लीं ह्सौः मूलाधारोपरि। मूलविद्यां व्या
पकत्वेन न्यसेत्। त्रैलोक्यमोहनचक्राय नमः। अकुलपद्मे॥ सर्वा

१९

१ त्रिकुटे। सर्वसंक्षोभकचक्रायनमः। मूलाधारे सर्वसौ
भाग्यचक्रायनमः

शांपरिपूरक चक्राय नमः। स्वाधिष्ठाने। सर्वार्थसाधन चक्राय नमो
मणिपूरे। सर्वरक्षाकर चक्राय नमः। अनाहते। सर्वरोगहर चक्राय न
मः।। विशुद्धौ। सर्वसिद्धिप्रद चक्राय नमः। लंबिकायां। सर्वानंदम
यमहा चक्राय नमः। मूलाद्यादि ब्रह्मरंध्रांतं अकुले। ऐं क्लीं सौः विषु
वे। ह्रीं क्लीं सौः मूलाधारे। हैं क्लीं ह्सौः स्वाधिष्ठाने। ह्सौः ह क्लीं ह्सौः म
णिपूरे। ह्रीं क्लीं ब्लूं अनाहते। श्रीं ह्रीं सौः विशुद्धौ। ह्सैं ह क्लीं ह्सौः लंबिका
यां। ऐं ३ मूलविद्यां भ्रूमध्यादि ब्रह्मरंध्रांतं न्यसेत्। पुनः करशुद्धिं वि
धाय।। ह्रां ऐं क्लीं सौः अंगुष्ठाभ्यां नमः। ह्रीं ऐं क्लीं सौः तर्जनीभ्यां नमः
ह्रूं ऐं क्लीं सौः मध्यमाभ्यां नमः। ह्रैं ऐं क्लीं सौः अनामिकाभ्यां नमः। ह्रौं ऐं क्लीं
सौः कनिष्ठिकाभ्यां नमः। ह्रः ऐं क्लीं सौः करतलकरपृष्ठाभ्यां। इत्यंगु
लिन्यासं विधाय। अं आं सौः इति पुनः करशुद्धिं कुर्यात्। वाग्भवम्मू
धारे कामराजं हृदये। शक्तिं भ्रूमध्ये। समस्तविद्यां ब्रह्मरंध्रे विन्य
स्य समस्तप्रकटगुप्तगुप्ततरकुलकौलनिगर्भरहस्यातिरहस्यपर
पररहस्य संज्ञक श्रीचक्रदेवतायोगिनी श्रीपादुकां पूजयामीति शरी
रं श्रीचक्ररूपं भावयन् व्यापकं कुर्यात्। इति स्थितिन्यासः।।
वक्ष्यमाण हृदयादि षडंगन्यास मंत्रैः अंगुलिन्यासं विधाय। अं आं १९
सौः इति करौ शोधयेत्। ततः ह्रां ऐं क्लीं सौः सर्वज्ञायै हृदयाय नमः।
ह्रीं ऐं क्लीं सौः नित्यतृप्तायै शिरसे स्वाहा। ह्रूं ऐं क्लीं सौः अनादिबो

धायै शिखायै वौषट्। हैं ऐं क्लीं सौः स्वतंत्रायै कवचाय हुं। हौं ऐं क्लीं सौः नित्यमु
दितायै नेत्रत्रयाय वौषट्। हः ऐं क्लीं सौः अनंतायै अस्त्राय फट्॥ इति षडंगं विधा
य वाग्देवताष्टन्यासं कुर्यात्। ऐं ह्रीं श्रीं अं १६ ब्लूं वशिनी वाग्देवतायै नमः
शिरसि। ऐं ह्रीं श्रीं कं ५ कल ह्रीं कामेश्वर्यै वाग्देवतायै नमः भाले ऐं ह्रीं श्रीं
चं ५ न्व्लीं मोदिनी वाग्देवतायै नमः भ्रूमध्ये ऐं ह्रीं श्रीं टं ५ य्लूं विमला वाग्दे
वतायै नमः कंठे ऐं ह्रीं श्रीं तं ५ ज्म्रीं अरुणा वाग्देवतायै लिंगे। ऐं ह्रीं श्रीं
शं षं सं हं लं क्षं म्रीं कौलिनी वाग्देवतायै ऊरुमूलादिपादाग्रपर्यंतं। इ
ति वाग्देवताष्टकन्यासः॥ प्रथमकूटमुच्चार्य अग्निचक्रे कामगिरिपी
ठे मित्रेशनाथात्मिके कामेश्वरी देवि रुद्रात्मशक्ति श्रीपादुकां पूज
यामि मूलाधारे। द्वितीयकूटमुच्चार्य सोमचक्रे जालंधरपीठे वज्रे
श्वरी देवी स्वात्मशक्ति श्रीपादुकां पूजयामि हृदये। तृतीयकूटमु
च्चार्य सोमचक्रे पूर्णगिरिपीठे ॐ श्री उड्डीशनाथात्मिके भगमालिनी
देवी ब्रह्मात्मकशक्ति श्रीपादुकां पूजयामि भ्रूमध्ये॥ समस्तविद्या
मुच्चार्य ब्रह्मचक्रे ॐ ज्ञानपीठे चर्यानाथात्मिके परब्रह्मात्मिके श
क्ति महात्रिपुरसुंदरी श्रीपादुकां पूजयामि ब्रह्मरंध्रे॥ इति चतुःपी
ठन्यासः॥ ऐं वाग्भवमुच्चार्य आत्मतत्त्वाय नमः॥ पादादिनाभिपर्यं
तं क्लीं कामराजमुच्चार्य विद्यातत्त्वाय नमः नाभ्यादिकंठपर्यंतं॥

सौः शक्तिमुद्रार्ये शिवतत्त्वाय नमः कंठादि शिरःपर्यंतं॥ ऐं क्लीं सौः स
कलविद्यामुद्रार्य सर्वतत्त्वाय नमः इति। शिरः प्रभृति पादाग्र पर्यंतं विन्य
२० सेदिति तत्त्वन्यासः॥ जपाकुसुम भासुरां त्रिनयनां। त्रिकोणत्रय त्रयांत
२० रनिवासिनीं त्रिपुरसुंदरीं सेंदुकां॥ कराम्बुज ततु ईर्यां मधुरचापपा
शांकुशां प्रसून शर शोभिनीं ललित वेषभूषां भजे॥ इति ध्यात्वा स्वा
भेदेन देवतां विचिंत्य योनिमुद्रां च प्रणम्य मानसैरुपचारैरभ्यर्च
येत्॥ ततो गुरूं प्रणम्य शंखस्थापनं कुर्यात्॥ आत्मनः पुरतो वायव्य
भागे त्रिकोणं विलिख्य तत्र अस्त्राय फडिति प्रक्षालितं। त्रिपदीं निधा
य दशाकलात्मने ग्निमंडलाय नम इति त्रिपदीं संपूज्य तस्यामस्त्र
प्रक्षालितं शंखं निधाय द्वादश कलात्मने सूर्याय नम इति शंखं संपू
ज्य प्रणवेन जलमापूर्य षोडश कलात्मने सोममंडलाय नम जलं सं
पूज्य तेन जलेन यागभूमिं सर्वां प्रोक्षेत्॥ ततः शंख दक्षिण भागे
त्रिकोण षट्कोण वृत्त चतुरस्र मंडलं विलिख्य। ऐं क्लीं सौः सौः क्लीं ऐं इ
ति पूर्व नैर्ऋत्य वायव्य पश्चिमाग्नेयेशान कोणेषु संपूज्याने नैव क्र
मेण कोणेष्वासनानि पूजयेत्॥ अं आं सौः त्रिपुरा कलादेवि अमृता
र्णवासनाय नमः॥ ऐं क्लीं सौः त्रिपुरेश्वरि योनां बुजासनाय नमः॥ २०
ह्रीं क्लीं सौः त्रिपुरसुंदरी देवीस्वात्मासनाय नमः॥ हैं ह्क्लीं ह्सौः त्रिपुर

वासिनी देवी सर्वेत्रकासनाय नमः॥ ह्सौं ह क्लीं ह्सौः त्रिपुराश्री देवी सर्वमंत्रा
सनाय नमः॥ ह्रीं क्लीं ब्लें त्रिपुरमालिनि देवी साध्यासनाय नम इति संपूज्य
अग्नि ईशा सुर वायु कोणेषु हृदयादिकमंग चतुष्टयं संपूज्य पुरतो नेत्रं दि
क्षु पूर्वादिष्वस्त्रं पूजयेत्॥ ऐं कामरूपपीठाय नमः। सौः जालंधरपीठाय
नमः। ऐं क्लीं सौः ॐ ज्ञानपीठाय नमः। पूजयेत्। मध्ये कामकलां लिखेत्॥
इति मंडले अस्त्रक्षालित त्रिपदीं निधाय रांरीं रूं लवरयूं रं धर्मप्रदद्दश क
लासने अग्निमंडलाय नम इति संपूज्य। यं धूम्रार्चिषे नमः। रं उष्मायै न
मः। लं ज्वालिन्यै नमः। वं ज्वालिन्यै नमः। शं विस्फुलिंगिन्यै नमः॥ षं सुश्रि
यै नमः। सं सुरूपायै। हं कापिलायै। लं हव्यवहायै। क्षं कव्यवहायै नमः
इति दश वह्नि कलाः संपूजयेत्॥ ततस्त्रिपद्यां सुवर्णरजतताम्रमृन्म
या नामन्यतमं कलशं अस्त्रप्रक्षालितं निधाय। कं भं तपिन्यै नमः। खं
वं तापिन्यै नमः। गं फं धूम्रायै। घं पं मरीच्यै। ङं नं ज्वालिन्यै। चं धं रुच्यै।
छं थं सुषुम्णायै। जं तं भोगदायिन्यै। झं णं विश्वायै। ञं ढं बोधिन्यै।
टं ढं धारिण्यै। ठं डं क्षमायै नम इति कलशे संपूज्य। ह्रां ह्रीं ह्रूं हमलव
रयूं हं वसुप्रदद्वादश कलासने सूर्यमंडलाय नम इति च संपूज्य क
लशे मातृकामुच्चरन् कर्पूरादि सुवासितं जलं पूरयेत्॥ ततो जले
सां सीं सूं समवरयूं सं कामप्रदषोडश कलासने सोममंडलाय नमः

इति संपूज्य ॥ अं असितांगनमः । आं ब्रह्माण्यै नमः । इं रुरु भैरवायनमः । ईं
२१ माहेश्वर्यै नमः । उं चंड भैरवाय नमः । ऊं कौमार्यै नमः । ऋं क्रोधभैरवाय
नमः । ॠं इंद्राण्यै नमः । ॐ भीषण भैरवाय नमः । अं चामुंडायै नमः । अं सं
हार भैरवाय नमः । अः महालक्ष्म्यै नमः । इति कलशस्य पूर्वादितः । आ
ग्नेयां तं पूजयेत् ॥ ततः अं अमृतायै । आं आनंददायै । इं पूषायै ।
ईं तुष्ट्यै । उं पुष्ट्यै । ऊं धृत्यै । ऋं रत्यै । ॠं शशिन्यै । लृं चंद्रिकायै ।
ॡं कांत्यै । एं ज्योत्स्नायै । ऐं श्रियै । ॐ प्रीत्यै । अं अंगदायै । अं पूर्णायै ।
अः पूर्णामृतायै । इति षोडशसोमकलाः मध्ये पूजयेत् ॥ कलशाद
क्षिणभागे मत्स्य मुद्रया कलशस्थापनमंडलवदेवमंडलं विलिख्य
पूर्ववदेव मंडलं संपूज्य त्रिपदीं निधाय तथैव वह्निकलाः संपूज्य
तस्य । स्फुवर्णरजतताम्रमयानामन्यतमं पात्रं निधाय पूर्ववदेवसूर्य
ये कलाः । संपूज्य पात्रमध्ये गंधाष्टकं निक्षिप्य कलशस्थजलं पात्रां
तरे पाकलशमचालयन्नुधृत्य मूलमंत्रेण वं पूरयेत् । ऐं इति पुष्पे पा
र्घ्यपात्र जलम् । ब्लौं अरपुष्पं निरस्य क्लीं इति गंधाष्टकलोलितं पुष्पं
निक्षिप्य सौः इति गालिनी मुद्रया जलं विलोतय । सां सीं सूं सम
लवरयूं सं कामप्रदे षोडशकलात्मने सोममंडलायदिव्यामृता २१
यनम इति जलं संपूज्य पूर्ववदेव भैरवाष्टकं ब्रह्माण्यादिशक्ति

सहितं पूजयेत्। ततो जलमध्ये षोडश सोमकलाः पूजयेत्। ग्लूं गगनरत्नाय नमः। स्लूं स्वर्गरत्नाय नमः। म्लूं मर्त्यरत्नाय नमः। प्लूं पातालरत्नाय नमः। जलमध्ये चतुर्दिक्षु पूजयेत्। जलमध्ये तत्र योनिचक्रं विलिख्य। मध्ये त्रिकोणे अकारादि षोडशस्वरान् दक्षिणतः ककारादितकारांतान् षोडशवर्णान् पूर्वतः थकारात् सकारांतान् षोडश वर्णान् उत्तरतः पङ्क्ति त्रयाकारेण लिखेत्। लिखितं भावयेदित्यर्थः मध्ये हंक्षं इति विरलं विलिख्य वर्णयोर्मध्य कामकलां विलिखेत्। अंतस्त्रिकोणाग्रभवाकृतिं विचिंत्य ऐं ह्रीं श्रीं ऐं ब्लूं ॐ ज्रूं सः अमृते अमृतेश्वरि अमृतोद्भवे अमृतवर्षिणी अमृतं स्रावय स्वाहेति अमृतेश्वरी विद्यया वारत्रयमभिमंत्रयेत्। अखंडैकरसानंदकलेवरसुधात्मनि स्वच्छंदस्फुरणामत्र निधेहि अकुलरूपिणी। इति वारचतुष्टयमभिमंत्रयेत्। हसक्षमलवरयूं आनंदभैरवाय नमः। सहक्षमलवरयीं आनंदभैरव्यै नमः। इति जलमध्ये संपूज्य सुधादेव्यै वौषडिति अभिमंत्रयेत्। ततः अकुलस्थामृताकारे सिद्धज्ञानकरे परे। अमृतत्वं निधेह्यस्मिन् वस्तुनि क्लिन्नरूपिणी ति वारपंचकमभिमंत्रयेत्। ततः हसक्षमलवरयूं सहक्षमलवरयीं इति नवासकमिथुनेन सप्तवारमभिमंत्रयेत्। ततो मूलमंत्रेण दशवारं नित्यामंत्रैरभिमंत्र्य कामकलया वा त्रयमभिमंत्रयेत्। ततः ॐ ह्रीं हंसः सोऽहं स्वाहा। आत्मशक्ति

श्री पादुकां पूजयामि। अ आ र क च ट त प य रा प्रा पा शक्ति श्रीपा
दुकां पूजयामि। इ ई रे ख घ छ ठ थ फ र क्षा अ गिन शक्ति श्रीपादुकां पू
२२ जयामि। उ ऊं ॐ ग ज उ द व ल इ ला शक्ति श्री पादुकां पूजयामि। ऋ
ॠ ऌ ऐ ल झ ट ध भ व स अं बु शक्ति श्री पादुकां पूजयामि। ॡ
ॡ अं ङ भ पा न म ष ह व्योम शक्ति श्रीपादुकां पूजयामि। इति
मूलमंत्रैरभिमंत्रयेत्। चतुर्नवति कलाभ्यो नमः। इति संपूज्य
ॐ आं ह्रीं क्रों यरलवशषसहलक्ष हौं हंसः सोहं चतुर्नवति कलानां
प्राणाः चतुर्नवति कलानां जीव इह स्थितः चतुर्नवति कलानां सर्वेन्द्रि
याणि वाङ्मनश्चक्षुःश्रोत्रंघ्राण प्राण इहायांतु चिरं तिष्ठंतु स्वाहा
क्रौं ह्रीं आं इति प्राणप्रतिष्ठा चतुर्नवति कलानां कुर्यात्। षोडशानित्या
भ्यो नमः इति पूजयेत्॥ नवमुद्राः प्रदर्श्य दिव्यामृतं भावयेत्। इत्यर्घ
स्थापनविधिः॥ ततोर्घपात्रे जलबिंदुं पुष्पेणोद्धृत्य कलशे क्षिपेत्।
तेन जलेन कलशस्थे मालानं पूजोपकरणानि प्रोक्षयेत्॥ कलशा
स्थ जलमुद्धरणपात्रेणोद्धृत्य ततो दक्षिणभागे त्रिकोणं विलिख्य त
त्र त्रिपदीं निधाय तस्यां तस्यां निधाय तस्मिन् जलं किंचिद्वामकरे
गृहीत्वा शिरसि गुरुपरंपरास्तर्पयेत्॥ परमशिवनाथादितः स्वगु २२
रुपर्यंतं स्वनाम मूलाधारे ततः शाकिन्यादिधातु देवताः मूलाधारा

दि ब्रह्मरंध्रांतं संचिंत्य तर्पयेत्। ततो मूलाधारादि ब्रह्मरंध्रांतं तेजोरूप
मयीं कुंडलिनीरूपां परमेश्वरीरूपां मूलविद्यां। विभाव्य तत्तेजोमयं स्वश
रीरं देवताभेदेन संचिंतयेत्॥ अरुणां करुणातरंगिताक्षीं धृतपा
शांकुशपुष्पबाणचापां॥ अणिमादिभिरावृतां मयूखैरहमित्येव
विभावये भवानीं॥ स्वशिरसि समस्तप्रकटेति समष्टिमंत्रेण शिर
सि पुष्पांजलिं दत्वा गंधादिभिरात्मानमलंकृत्य षोडशनित्यामंत्रैः
शिरसि हृदये वा संपूज्य तर्प्पयेत्। आम्नायाक्षरेण मूलमंत्रेण मू
लेन वारत्रयं संपूज्य तर्पयेत्॥ गुरुपादुकां शिरसि विचिंत्य तर्पये
त्॥ पूर्णाभिषेकयुक्तः कामकलां विश्वांतिलब्धवान्। कामकल
या संपूज्य तर्पयेत्॥ तद्यथा॥ सकलानंदनाथश्रीपादुकां पूजयामीति त्रिः कलानंदनाथश्रीपादुकां॰। नवानंदनाथश्रीपादुकां॰। अ
कुलानंदनाथश्रीपादु॰। सिद्धिदानंदनाथश्रीपादु॰। परमसंविदानंद
नाथश्रीपादुकां॰। सपरार्धकलानाथश्रीपादु॰। सपरार्धकलाना
थश्रीबिंदुस्तनयुग्मश्रीपादु॰। सपरार्धकलानाथव्यंजितरेखायोनि
मुद्रांश्रीपादु॰। कामकलां स्वदेहे विभाव्य तदुच्चारणपूर्वकं परमसं
वित्कला महासुंदरी देवी श्रीपादु॰। एतेन संपूज्य तर्पयेत्। ततउद्धृत
जलं पात्रयपीठे पूजां कुर्यात्। एतावत्कर्तुमसमर्थः परमशिवमा
यादि गुरुपादुकां संपूज्य तर्पयेत्॥ स्व गुरुपादुकां वारत्रयं संपू

ज्य संतर्ष्यसकलप्रपंचम् तं सर्वसंसारोत्तीर्णं सच्चिदानंदरूपंपरम
देवताविग्रहं ध्यात्वा गुरुं देवतां मंत्रं चाभेदेन विभाव्य उद्धृतं जलं ग्रास्य
२२ पीठपूजां कुर्यात्‌॥ गं गणपतिनाथश्रीपादुकां पूजयामि। दूं तर्यं वाश्री
पा०। सुंदर्यं वाश्रीप०। सुमुखं वाश्रीप०। विरूपां वाश्रीप०। विमलां वा
93 श्रीप०। अं तर्यं वाश्रीप०। चंदर्यं वाश्रीप०। पुरवर्यं वाश्रीप०। पुष्पमर्दं सं
वाश्रीप०। इति पीठशक्तिर्नवपूर्वादिदिक्षु पीठमध्ये संपूजयेत्‌॥ मि
त्रेशनाथश्रीपा०। षष्ठीशनाथश्रीप०। उड्डीशनाथश्रीपादुकां०। चर्या
नाथश्रीप०। इति पूर्वादिचतुर्दिक्षु पीठमध्ये संपूजयेत्‌॥ गं गणपति
नाथश्रीप०। वं वटुकनाथश्रीप०। क्षं क्षेत्रपालनाथश्रीप०। दुं दुर्गां
वाश्रीप०। इति पीठचतुर्दिक्षु पूजयेत्‌॥ तत आधारशक्त्यं वाश्रीपा०।
कूर्मनाथश्रीप०। अनंतनाथश्रीप०। पृथिव्यं वाश्रीप०। आधारशक्ते
रुपरि कूर्मं तदुपरि अनंतं। तदुपरि पृथिवीं भावयन्पूजयेत्‌॥ तत
अं आं सौः त्रिपुरबाला देवी अमृतार्णवासनाय नमः। ऐं क्लीं सौः त्रि
पुरेश्वरी देवी पोतांबुजासनाय नमः। ह्रीं क्लीं सौः त्रिपुरसुंदरी देवी दे
व्यासनाय। हैं ह्क्लीं ह्सौः त्रिपुरवासिनी देवी सर्वचक्रासनाय नमः।
ह्सैं ह्स्क्लीं ह्सौः त्रिपुराश्री देवी सर्वमंत्रासनाय नमः। ह्रीं क्लीं ब्लूं त्रिपु
रामालिनी देवी साध्यसिद्धासनाय। इति पीठे संपूजयेत्‌। ऐं क्लीं २३
सौः महात्रिपुरसुंदर्यासनाय नमः। देव्यासने श्रीचक्रे पुष्पांजलिं

विधाय कामगिरिपीठाय०। पूर्णगिरिपीठाय०। जालंधरीपीठाय०। ॐ आ
पापीठाय नमः इति संपूज्य हां पृथिव्यधिपतये ब्रह्मणे नमः। हीं अपाम
धिपतये विष्णवे नमः। हूं तेजोधिपतये रुद्राय नमः। हैं वाताधिपतये
ईश्वराय नमः। ह्रौं आकाशाधिपतये सदाशिवाय महाप्रेतपद्मासना
य नमः। इति श्रीचक्रे पूजयेत्। ततः समस्तप्रकटगुप्ततरसंप्रदाय गुप्त
कुलकौलनिगर्भरहस्यातिरहस्यपरापररहस्यसंज्ञक श्रीचक्रयो
गिनी देवताश्रीपादुकां पूजयामि। इति पुष्पांजलिं विधाय सर्वाभ्यः
पीठदेवताभ्यः सर्वोपचारान् परिकल्पयामि नमः। पुनः पुष्पांजलिं
विधाय प्रणमेत्॥ ततोंजलौ पुष्पाण्यादाय त्रिखंडमुद्रां विर
च्य वहन्नासारंध्राध्वनासकउंप्रपंच व्यापकं परब्रह्माविनाभूत
चिच्छक्तिं भक्तानुग्रहनिमित्तं तेजोरूपेण स्फुरंतीं विचिंत्य तां तेजो
रूपामंजलौ समानीय महापद्मवनांतस्थे कारुणानंदविग्रहे सा
र्वभूतहितेमातरेह्येहि परमेश्वरि। इति तां तेजोमयीं परमदेवतां
महाबिंदुचक्रे ह्सैं हक्लीं ह्सौः महात्रिपुरसुंदरी अस्मिन् चक्रे सा
निध्यं कुरु कुरु नमः इति स्थापयेत्॥ तां तेजः स्वरूपिणीं ध्यायेत्॥ त
तः पद्मनिभां देवीं बालार्क किरणारुणां। जपाकुसुमसंकाशां
दाडिमीकुसुमोपमां। पद्मरागप्रतीकाशां कुंकुमोदकसंनिभां॥
स्फुरन्मुकुटमाणिक्यकिंकिणीजालमंडितां॥ वालालिकुलसं

कान्ता कुटिलालक प वां ॥ प्रत्यग्यारुणसंकाश वदनांभोजमंड
लां ॥ किंचिदर्धेन्दु कुटिल ललाट मदु पट्टिकां ॥ पिनाक धनुराकार
२४ भ्रूलतां परमेश्वरी ॥ आनंदमुदितो ल्लोललीलां दोलिन विग्रह लो
चनां ॥ स्फुर न्मयूख संघात विकराधेम कुंडलो ॥ स्वगंडमंडला
२५ भोगजितेंदु मतमंडलां ॥ विश्व कर्मादिनिर्माण सूत्र सुस्पष्टनासि
कां ॥ नाम्र विद्रुमबिंबाभरक्तो ष्ठीमम्रतोपमां ॥ नैर्मूल्यजितकुंदेदु
दंतपंक्ति विराजितां ॥ रत्न द्वीपसमुल्लासि जिह्वाम लेसुभाषिणी ॥ स्मि
तमाधुर्य विजितमाधुर्यरससागरां ॥ करिकडवाहिनीद्राणीदनतां
बूल वीटिकां ॥ अनौपम्यगुणोपेतां चिबुकोद्देश शोभितां ॥ भुवनो
स्वस्ति कल्याण कंठसूत्र विराजितं ॥ कंबुग्री वां महादेवी मृणाललि
५ तैर्भुजैः ॥ घ्नतपाशांकुशाभिक्षु धनुःपुष्पशरान्वितां ॥ रक्तोत्पल
दलाकार सुकुमार करांबुजं ॥ करांबुज नखज्योत्स्नावितानितन
भस्तलां ॥ बाहुमुलेन केयूर कटकांगद शोभितां ॥ मुक्ता हार लतो
पेत समुन्नतपयोधरां ॥ त्रिवली वलनायुक्तमध्यदेश नशोभितां ॥
लावण्यासरिदावर्त्ता कार नाभिस्कशोभितां ॥ अनर्घ्यरत्नखचि २४
त कांचियुक्तनितंबिनी ॥ नितंबबिंबद्विरदरोमराजिवरांकुशां ॥
कदलीलल्लित स्तंभसुकुमारोरू मीश्वरी ॥ लावण्या कदलीतुल्य

धा० ७

जंघायुगलमंडितां॥ गुप्तगुल्फ पदद्वंद्व प्रपदाजित कच्छपां॥ ननु दीर्घां
गुलीभास्वन्नखपंक्तिविराजितां॥ चक्रस्वस्तिक शंखादि बिरोषांकित
पदद्वयं॥ ब्रह्मविष्णु शिरोरत्ननिघृष्ट चरणांबुजां॥ शीतांशुशतसंका
शकांति संतानहासिनीं॥ लौहित्यजितसिंदूर जपादाडिमरागिणीं॥
रक्तवस्त्रपरिधानांपाशांकुशकरोद्यतां॥ रक्तपुष्पनिविष्टांगुरत्ना
भरणमंडितां॥ चतुर्भुजां त्रिनेत्रां नपंचबाणधनुर्धरां॥ कर्पूरशाक
लोन्मिश्रितांबुलापूरितानना॥ महामृगमदोद्दाम कुंकुमारुण
विग्रहां॥ सर्वशृंगारवेषाढ्यां सर्वावयवशोभितां॥ जगदाल्हादज
ननीं जगद्रंजनकारिणीं॥ जगदाकर्षणकरी जगदानंदरूपिणीं॥
सर्वलक्ष्मीमयीं नित्यां परमानंदनंदितां॥ इति भक्तानुग्रहभरेण
वयवधारिणीं विचिंत्य चक्रमध्ये पूजामारभेत॥ संस्थापिन्यासं
स्थाप्य सन्निरोधिन्यासन्निरुध्य। सन्निधिन्यासन्निधाप्य प्रार्थयि
न्या प्रार्थयेत्॥ धेनुमुद्रया सुधाधारां देव्याः शिरसि पतंतीं चिंतये
त्॥ ततो देव्यंगेषु षडंगं विन्यस्य आसनं विद्यावत्नीयखंडेन द
द्यात्॥ ॐ व० आसनं ते नमः॥ अत्रास्तंभवतीमदनुग्रहाय इति॥ त
तः शंखस्योत्तरभागे त्रिणि ताम्रमयानि एकं कांस्यमयः एवं च
त्वारि पात्राणि त्रिकोणमंडलानि विलिख्य तेषु स्थापयेत् ताम्र
मयानि कर्पूरवासितैस्तोयैः पूरयेत॥ चतुर्थं कांस्यमयं दधि

मधुघृतैः पूरयेत्॥ पाद्यपात्रे लवंगोशीर चंदन नागकेसर कुंकु
मानि निक्षिपेत्॥ अर्घ्यपात्रे कुशाग्रदूर्वा विष्णुक्रांता कर्पूर चंदन
२५ श्वेतशर्षपान्निक्षिपेत्॥ आचमनीयपात्रे लवंगोशीर जातीफलती
25 कर्पूर सुगंधिपुष्पाणि च निक्षिपेत्॥ सर्वाणि मूलमंत्रेण बालया
वाभिमंत्र्य हस्ताभ्यां पाद्यपात्रस्थं पाद्यं पादांबुजयोर्दद्यात्॥
सर्वत्रोपचारो विद्याद्वितीयखंडेनेति तंत्रराजमतं॥ चतुःशत्यादि
मते बालया वा मूलेन वेति॥ सर्वत्रायं वदन साद्यंते नम इत्यादित
तदुपचारेषु ज्ञहनीयमिति॥ ततोऽर्घ्यपात्रेणार्घ्यं दद्यात् देव्यंज
लौ शिरसि वा॥ मुखेप्याचमनीयं॥ मधुपर्कं हस्ते दत्वा प्राशितं देव्ये
ति भावयेत्॥ कर्पूरशलाकां दंतधावनं॥ गंडूषं॥ मुखप्रक्षालन
केशांप्रसाधनं॥ चंपकादिना सुगंधितैलाभ्यंगं॥ उद्वर्तनं॥ उष्णो
दकस्नानं॥ पंचामृतस्नानं॥ कर्पूरादि सुगंधिजलैः कुंकुमोद
कैः स्नानं मूलमंत्राभिमंत्रितैः कलशजलैः कारयेत्॥ केशांगप्रो
छनं॥ पुनराचमनीं॥ इत्येकपचारान्विधाय दिव्यरक्तवस्त्रयुगं परि
धापयेत्॥ मणिपादुके दत्वा भूषामंडपायनाटंकयुगलं॥ नासा
भरणं॥ हारान्॥ कंठाभरणानि॥ केयूरकंकणरत्नांगुलीयककां २५
चीदामनूपुरयुगलचंद्रकलाशोभितमुकुटादिनानाकारैर्भूष
येत्॥ एतादृशालंकरणं कर्तुमशक्यत्वात् मनसा सर्वानुपचारा

न भाव्वेत्॥ इति गुरुसंप्रदायः॥ एवं भूषयित्वा। पूजामंडपमानीय श्री
चक्राधिष्ठिते दिव्यसिंहासने उपविशयेत्॥ ॐ जनं कस्तूरीतिलकं।
आदर्श। छत्रं चामरयुग्मं इति विविधोपचारैः परमदेवतां सत्कृ
त्य गंधाष्टकं समर्प्य अखंड तंडुलान् अक्षतान्नि विच्यमल्लिका जातीपु
न्नाग चंपकादिपुष्पाणि समर्प्य कंठे कह्लारमालामवलंबयेत्॥ त
तः पुष्पांजलिं पदयोर्दत्वा धूपग्रहणीमानीय तत्र विधूमानंगारान्नि
धायार्घ्यपात्रजलैः प्रोक्ष्य रमित्यंगारानभिमंत्र्य। ॐ सुरभितेज
से स्वाहेति दशांगादि धूपमंगारेषु क्षिपेत्॥ घंटामानीय अस्त्रेण प्रो
क्ष्य गंधपुष्पाक्षतैः संपूज्य प्रणवेनाभिमंत्र्य वामकरे घंटां गृहीत्वा
हि नास्ति देसतेजांसीति पद्येन वादयेत्। देव्या ला सिकाग्रे नीचैः त्रि ना
र्वामतो दक्षिण दक्षिणतो वाममिति चालयेत्॥ दक्षिणहस्तस्थितां
धूपग्रहणीं उत्तरभागे निधाय। बलिदेवताभ्यो निवेदयेत्। ततो दी
पग्रहणीमानीय अर्घ्यजलेन प्रोक्ष्य तां घृतेनापूर्य तत्र वर्त्तिकां निधा
य तां प्रज्वाल्य ॐ ज्वालामालिनि हुं फट् स्वाहेति ज्वालामभिमंत्र्य
धेनुमुद्रां प्रदर्श्य पुष्पैः संपूज्य पूर्ववद्देवघंटां वादयन् दक्षिणकर
स्थां दीपग्रहणीं सप्रकाशो महादीपः सर्वत्र तिमिरापहः। सबाह्याभ्यं
तरं ज्योति दीपोयं प्रतिगृह्यतामिति देव्याः शिरसि उपरि नीत्वा च
रणाग्रमानीय पुनः शिरसि उपरि नयेत्॥ एवं त्रिः प्रदक्षिणं भ्राम

येत्॥ दीपग्रहणीमुत्तरभागे निधाय बलिदेवताभ्यो निवेदयेत्॥ ततो
नैवेद्यं सुवर्णादिपात्रस्थं नानाभक्ष्यभोज्यचर्व्यचोष्यलेह्यपेयादि
२९ कमानीयास्त्रेण संप्रोक्ष्य धेनुमुद्रयामृतीकृत्य मूलेन वारत्रय
मभिमंत्र्य। अपोशानं दत्वा सत्पात्रे विधाविः सौख्याविविधानेकभ
२८ क्षणं। निवेदयामि देवेशि सानुगायै गृहाण॥ ततः इदं नैवेद्यं भगव
त्यै त्रिपुरसुंदर्यै कामेश्वरीसहितायै निवेदयामीति निवेदयेत्॥ ग्रा
समुद्रया प्राणाय स्वाहेत्यादि पंचमंत्रैः पंचग्रासी कारयेत्। ततः ऐं
आत्मतत्वव्यापि महात्रिपुरसुंदरी कामेश्वरी तृप्यतु। क्लीं विद्यात
त्वव्यापि काम महात्रिपुरसुंदरी कामेश्वरी तृप्यतु॥ सौः शिवतत्वव्या
पक महात्रिपुरसुंदरी कामेश्वरी तृप्यतु॥ ऐं क्लीं सौः सर्वतत्वव्या
पिका महात्रिपुरसुंदरी कामेश्वरी तृप्यतु॥ ऐं आत्मतत्वव्यापकः
कामेश्वरस्तृप्यतु। क्लीं विद्यातत्वव्यापकः कामेश्वरस्तृप्यतु॥ सौः शि
वतत्वव्यापकः कामेश्वरस्तृप्यतु। ऐं क्लीं सौः सर्वतत्वव्यापकः कामे
श्वरस्तृप्यतु॥ इति नैवेद्यवस्त्रावृतं नर्हितः देवीं देवसहितां भुक्त
वतीं भावयेत्॥ उत्तरापोशानं दत्वा हस्तप्रक्षालनं पुनराचमनीयं
मुखवासं च दत्वा कर्पूरशकलमिश्रतांबूलं समर्प्य प्रसन्नार्घ्यं द
द्यात्॥ तद्यथा। पूर्वस्थापितार्घ्यपात्रे जलमापूर्य पूर्वोक्तद्रव्या २९
णि निक्षिप्य मूलमंत्रोच्चारपूर्वकं महात्रिपुरसुंदर्यै भगवत्यै प्र

संज्ञार्घ्यं नम इति देव्यंजलौ अर्घ्यं दत्वा ॥ ततो नमस्कृत्य आवरण पूजां कु
र्यात् ॥ अथवा पुष्पांतां पूजां विधाय आवरण पूजां कुर्यात् ॥ पश्चान्नैवे
द्यं सपरिवाराये निवेदयेत् । संविन्मयि परे देवि परामृत चरुप्रिये । अ
नुज्ञां त्रिपुरे देहि परिवारार्चनाय मे ॥ इति अनुज्ञां लब्ध्वा वरणपूजां कुर्या
त् ॥ आदौ मूलकुटत्रयम् महात्रिपुरसुंदरी देवी श्रीपादुकां पूजयामि तर्पयामि इति सं
पूज्य तर्पयामि नम इति संकेतमुद्रया अर्घ्यजलबिंदुना तर्पयेत् ॥ अयं
विधिः पूजायां ज्ञेयः ॥ इति वैंदवे चक्रे वार त्रयं संपूज्य संतर्प्य । ऐं ह्रीं
श्रीं अं सकल ह्रीं नित्यक्लिन्ने मदद्रवे सौः कामेश्वरी नि सा श्रीपादु० । ऐं
ह्रीं श्रीं आं मध्यम कूटमुच्चार्य ऐं भगभुगे भगिनि भगोदरि भगमाले
भगावहे भगगुह्ये भगयोनि भगनिपातिनि सर्वभगवशंकरि भग
रूपे नित्यक्लिन्ने भगस्वरूपे सर्वाणि भगानि मे ह्यानय वरदे रेते सुरे
ते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय अमोघे भगविच्चे क्षुभ क्षोभय
सर्वसत्वान् भगेश्वरि ऐं ब्लूं जं ब्लूं भें ब्लूं मों ब्लूं हें ब्लूं हक्लिं क्लिन्ने सर्वाणि भगानि
ह्रीं मे वशमानय स्त्रीं स्वाहा क्लीं भगमालिनि नि सा श्रीप० । ऐं ह्रीं श्रीं इं प्रथम
कूटमुच्चार्य नित्यक्लिन्ने मदद्रवे स्वाहा नित्यक्लिन्ना नि सा श्रीपा० । ऐं ह्रीं
श्रीं ईं ॐ क्रों भ्रों क्रौं झ्रौं छ्रौं ज्रौं स्वाहा भेरुंडा नित्या श्रीपादुकां० । ऐं ह्रीं श्रीं
उं ॐ ह्रीं वह्निवासिन्यै नमः वह्निवासिनी नित्या श्रीपा० । ऐं ह्रीं श्रीं
ह्रीं क्लिन्ने ऐं क्रौं नित्यमदद्रवे ह्रीं महावज्रेश्वरी नित्या श्रीपा० । ऐं ह्रीं श्रीं
ऋं ह्रीं शिवदूत्यै नमः शिवदूती नित्या श्रीपादु० । ऐं ह्रीं श्रीं ॠं ॐ ह्रीं कुं

सेवच्छे क्षस्त्रीं हूं क्षे ह्रीं फट् ल रितानित्याश्रीपादु० ऐं ह्रीं श्रीं ल्हं ऐं क्लीं सौः
कुलसुंदरी नित्याश्रीपादु० ऐं ह्रीं श्रीं ह्रूं हसकलवडैं हसकलरडीं हस
(२१) कलरडौं नित्या नित्याश्रीपा० ऐं ह्रीं श्रीं ऐं ह्रीं फ्रें [illegible] स्त्रूं क्रों आं क्लीं च्लूं ऐं
निक्लमदद्रवे कुं क्रूं ह्रीं नी लपता [illegible] कानित्याश्रीपादु० ऐं ह्रीं श्रीं ऐं
भमवयऊ ॐ विजयानित्याश्रीपादु० ऐं ह्रीं श्रीं ॐ स्वौं सर्वमंगलानि
त्याश्रीपा० ऐं ह्रीं श्रीं ओं ॐ नमो भगवती ज्वालामालिनि देवदेवि सर्व
भूत संहार कारिके जातवेद सि ज्वल ज्वल ज्वल प्रज्वल प्रज्वल ह्रां
ह्रीं ह्रूं र र र र र र र र ज्वालामालिनि हुं फट् स्वाहा ज्वालामालिनी नित्या
श्रीपादुकां० ऐं ह्रीं श्रीं अं व कौं चित्रा नित्या श्रीपादु० ऐं ह्रीं श्रीं अः मू
लमु चार्यं महात्रिपुरासुंदरी देवी नित्यश्रीपादु० मोक्षार्थिनां तु तुरी
यमु चार्यं महात्रिपुरसुंदरी नित्याश्रीपादु० इति कामेश्वर्यादि पंच
अंत स्त्रिकोणाग्रमारभ्य आग्नेय कोणांतं पूजयेत्। वज्रेश्वर्यादि पंच
आग्नेयादि ईशान कोणांतं पूजयेत्। नीलपताकादि पंच ईशानादि
पश्चिमकोणांतं पूजयेत्॥ षोडशीं महात्रिपुरसुंदरीं वैदवे पूजयेत्॥
इति चतुःसत्यादितंत्रराजमते तु देव्याः शरीरस्य पंचदश संपूज्य षो
डशीं सकलनित्यारूपिणीं महात्रिपुरसुंदरीं पूजयेदिति॥ ततस्ति
थिनित्यां पूजयेत् तिथिनित्या नाम या नित्या यस्यास्ति चेद्भवति तां स्व
कीयस्थाने पूजयेत्॥ तथाहि शुक्लपक्षे कामेश्वर्यादि चित्रांताः ३१
प्रतिपदादि पौर्णमास्यांतं क्रमेण एकैक नित्या भवति। प्रतिपदका

मेश्वरी द्वितीयायां भगमालिनित्यादि। कृष्णपक्षेषु चित्रादि कामेश्वरीपर्यंतं

व्युत्क्रमेण प्रतिदिनमेकैका नित्या भवति। प्रतिपदि चित्रा। द्वितीयायां ज्वा

लामालिनि त्यादि तिथिवृद्धौ या तिथिर्वर्धते तस्यां तत्पूर्वदिने च एकै

व पूज्या तिथिनित्या। तिथिक्षये या क्षीयते तिथिः तत्तिथिनित्या तत्पू

र्वतिथिनित्या च पूज्या॥ तेन नित्याद्वयमेकास्मिन्दिने पूजनीयं भवति।

पौर्णमास्यां कृष्णप्रतिपदि च चित्रा पूज्या भवति॥ अमायां शुक्लप्रति

च कामेश्वर्यैव पूज्या भवति। इति तिथिनित्या नामार्चनक्रमः। केषांचि

न्मते तिथिनित्या श्रीचक्राद्बहिः त्रिकोणमंडलं विधाय तत्र पूजयेत्

प्रकृत नित्याः संपूज्य ऐं ह्रीं श्रीं ॐ ह्रीं हंसः सोहं स्वाहा॥ आत्मशक्ति श्री

पादुका०। ऐं ह्रीं श्रीं अआ एक चटतपयश प्राणशक्ति श्रीपादु०। ऐं ह्रीं

श्रीं इई ऐं खछठथफरक्ष अग्निशक्ति श्री०। ऐं ह्रीं श्रीं उऊ ॐ गजडद

वलङ ला शक्ति श्री०। ऐं ह्रीं श्रीं ऋॠ ओघढध भवस अंबुशक्ति श्री

प०। ऐं ह्रीं श्रीं लृॡ अं ङञणनम ह व्योमशक्ति श्रीपा०। इति भूतमंत्रैः

संपूज्य परमशिवनाथादि गुरुपरंपरां पूजयेत्। ऐं ह्रीं श्रीं परमशिवना

थ श्रीपादु०। ऐं ह्रीं श्रीं पराशक्त्यंबा श्रीप०। ऐं ह्रीं श्रीं कामेश्वर्यंबा श्रीप०।

ऐं ह्रीं श्रीं वज्रेश्वर्यंबा श्रीप०। ऐं ह्रीं श्रीं भगमालिन्यंबा श्रीप०। ऐं ह्रीं श्रीं

लोपामुद्रांबा श्रीप०। ऐं ह्रीं श्रीं अगस्त्यानंद श्रीप०। इति दिव्यौघाः। ऐं

ह्रीं श्रीं कंकलानंदनाथ श्रीप०। ऐं ह्रीं श्रीं धर्माचार्यानंदनाथ श्रीप०। ऐं

ह्रीं श्रीं मुक्तकेशिन्यंबा श्रीप०। ऐं ह्रीं श्रीं दीपकानंदनाथश्रीप०। इति
सिद्धौघः। ऐं ह्रीं श्रीं जिष्णुदेवानंदनाथश्रीप०। ऐं ह्रीं श्रीं मातृगुप्तानंदना
२८ थश्रीप०। ऐं ह्रीं श्रीं तेजोदेवानंदनाथश्रीप०। ऐं ह्रीं श्रीं मोजानंदनाथ
श्रीप०। ऐं ह्रीं श्रीं मनोजवानंदनाथश्रीप०। ऐं ह्रीं श्रीं कामानंदनाथश्रीप०।
२८ ऐं ह्रीं श्रीं अजानंदनाथश्रीप०। ऐं ह्रीं श्रीं परानंदनाथश्रीप०। इति मान
वौघाः। ऐं ह्रीं श्रीं महेश्वरानंदनाथश्रीप०। ऐं ह्रीं श्रीं अचिंत्यानंदनाथ
श्रीप०। विद्दंबा श्रीप०। ऐं ह्रीं श्रीं रामानंदनाथश्रीप०। संविद्दंबा श्रीप०। ऐं
ह्रीं श्रीं ज्ञानानंदनाथश्रीप०। संविद्दंबा श्रीप०। ऐं ह्रीं श्रीं कामानंदना
थ संविद्दंबा श्रीप०। ऐं ह्रीं श्रीं आज्ञानाथनंद संविद्दंबा श्रीप०। ऐं ह्रीं
श्रीं पूर्णाभिषेकानंद गरं स्वनाम मूलाधारे इति स्वगुरुपरंपरा मध्य
त्रिकोणस्थ पश्चिमे विमलाजयिन्योर्मध्ये पंक्तिः त्रयाकारेण ॐ दि
व्यंसंपूज्य स्वगुरुपरंपरां पंक्तयाकारेणैव ॐ घत्रयस्य पश्चाद्भागे पू
जयेत्॥ केषांचिन्मते पश्चिमरेखायां वहिः वायव्यादि नैरृत्यांत
दिव्यौघः नैरृत्यादि आग्नेयांतं सिद्धौघः। आग्नेयादि ईशानमांतं मा
नौघाः। ईशानादि वायव्यांतं स्वगुरुपरंपराक्रमः पूजनीय इति॥ ऐं ह्रीं
श्रीं ऐं सर्वज्ञताहृदयशक्ति श्रीपा०। ऐं ह्रीं श्रीं क्लीं नित्यतृप्ताशिरःश
क्ति श्रीप०। ऐं ह्रीं श्रीं सौः अनादिवोधता वत्रिशिखाशक्ति श्रीप०। ऐं ह्रीं
सौः स्वतंत्रता कवचशक्ति श्रीप०। ऐं ह्रीं श्रीं क्लीं नित्यमलुप्ततानेत्रत्र २८
यशक्ति श्रीप०। ऐं ह्रीं श्रीं ऐं अनंतताअस्त्रशक्ति श्रीप०। इति त्रिकोणां

तराल आग्नीसासुरवायव्य कोणेषु चतुष्टयं संपूज्य पुरतो नेत्रं दिक्षु अस्त्रं इति पूजयेत्॥ अस्त्राय नम इति चतुष्टयावृत्तिः॥ ऐं ह्रीं श्रीं त्रैलोक्यमोहन चक्राय नमः॥ बाह्य चतुरस्र रेखाय नमः॥ इति संपूज्य ऐं ह्रीं श्रीं अणिमादिसिद्धि श्रीपा॰। पश्चिमे। ऐं ह्रीं श्रीं लघिमा सिद्धि श्रीप॰। उत्तरे। ऐं ह्रीं श्रीं महिमासिद्धि श्रीप॰ पूर्वदिशि ऐं ह्रीं श्रीं ईशित्व सिद्धि पाः। ऐं ह्रीं श्रीं ईशित्वसिद्धि श्रीप॰। दक्षिणे। ऐं ह्रीं श्रीं वाशित्वसिद्धि श्रीप॰। वायव्ये। ऐं ह्रीं श्रीं प्राकाम्य सिद्धि श्रीप॰। ईशाने। ऐं। ह्रीं श्रीं भुक्ति सिद्धि श्रीपा॰। आग्नेये। ऐं ह्रीं श्रीं स्वेच्छा सिद्धि श्रीपा॰। नैरृत्ये। ऐं ह्रीं श्रीं प्राप्तिसिद्धि श्रीपा॰। ऐं ह्रीं श्रीं कुं कौमारी देवी श्रीपा॰। ऐं ह्रीं श्रीं रुं वैष्णवी देवी श्रीपा॰। ऐं ह्रीं श्रीं अं चामुण्डा देवी श्रीपा॰। ऐं ह्रीं श्रीं अः महालक्ष्मी देवी श्रीपा॰। इति पूर्ववदेव पश्चिमादितः पूजयेत्। अंतश्चतुरस्र रेखायै नमः इति संपूज्य। ऐं ह्रीं श्रीं द्रां सर्वसंक्षोभिणी मुद्रा देवी श्रीपा॰। ऐं ह्रीं श्रीं द्रीं सर्वविद्राविणी मुद्रा देवी श्रीपा॰। ऐं ह्रीं श्रीं क्लीं सर्वाकर्षिणी मुद्रा देवी श्रीपा॰। ऐं ह्रीं श्रीं ब्लूं सर्वावेश मुद्राकरी देवी श्रीपा॰। ऐं ह्रीं श्रीं सः सर्वोन्मादिनि मुद्रा देवी श्रीपा॰। ऐं ह्रीं श्रीं क्रोंं सर्वमहांकुशामुद्रा देवी श्रीपा॰। ऐं ह्रीं श्रीं हसखफ्रें सर्वखेचरी मुद्रा देवी श्रीपा॰। ऐं ह्रीं श्रीं ह्सौः ह्क्लीं ह्सौः सर्वात्रिखंड मुद्रा देवी श्रीपा॰। ऐं ह्रीं श्रीं ह्सौः सर्वबीज मुद्रा देवी श्रीपा॰। ऐं ह्रीं श्रीं ऐं सर्वोसंपत्तिकरी महायोनि मुद्रा देवी श्रीपा॰। इति मुद्रा देवताः आणिमादिवत् पश्चिमादितः पूज्याः। ऐं ह्रीं श्रीं। ततः

१० ऐं ह्रीं श्रीं त्वं... ऐं ह्रीं श्रीं ऐं ... देवी श्रीं॥०

२८ ऐं सप्तदशसहस्रकोटि ... ऐं क्लीं श्रीं ... देवी श्रीपा॰

ॐ ऐं सौः त्रिपुराकलाचक्रेश्वर्यै देव्यै स्वाहा। त्रिपुराकलाचक्रेश्वरी दे
वी श्रीपा०। त्रिचक्रेश्वरीं मोक्षासिद्धेर्दक्षिणतः किं। चिदूरे दक्षिणां संपू
२९ ज्य द्रां सर्वसंक्षोभणी मुद्रा देवी श्रीपा०। इति चक्रेश्वर्या वामभागे पूजये
त्। ऐं ह्रीं श्रीं अणिमासिद्धि श्रीपा०। इति सिद्धिं दक्षिणतः। पूजयेत्॥
अयमेव क्रमः सर्वत्र आवरणसमाप्तौ ज्ञेयः। चक्रेश्वर्या वामतो मु
द्रा पूजा॥ दक्षिणतः सिद्धिं पूजयेत्॥ ततः क्षोभिणीमुद्रां प्रदर्श्य एताः
प्रकटयोगिन्यः त्रैलोक्यमोहनचक्रे समुद्राः ससिद्धयः सायुधाः
सवाहनाः सपरिवाराः पूजिताः तर्पिताः संतु नम इति पूजां समर्पयेत्॥
इति प्रथमावरणं। ऐं ह्रीं श्रीं सर्वाशापरिपूरकचक्राय नमः। षोडशद
लपद्माय नम इति संपूजा ऐं ह्रीं श्रीं अं कामाकर्षिणी नित्याकलादेवी
श्रीपा०। ऐं ह्रीं श्रीं आं बुध्याकर्षिणी नित्याकलादेवी श्रीपा०। ऐं ह्रीं श्रीं
इं अहंकाराकर्षिणी नित्याकलादेवी श्रीपा०। ऐं ह्रीं श्रीं ईं शब्दाकर्षि
णी नित्याकलादेवी श्रीपा०। ऐं ह्रीं श्रीं उं स्पर्शाकर्षिणी नित्याकलादे
वी श्रीपा०। ऐं ह्रीं श्रीं ऊं रूपाकर्षिणी नित्याकलादेवी श्रीपा०। ऐं ह्रीं श्रीं
ऋं रसाकर्षिणी नित्याकलादेवी श्रीपा०। ऐं ह्रीं श्रीं ॠं गंधाकर्षिणी
नित्याकलादेवी श्रीपा०। ऐं ह्रीं श्रीं लृं चित्ताकर्षिणी नित्याकलादे २९
वी श्रीपा०। ऐं ह्रीं श्रीं ॡं धैर्याकर्षिणी नित्याकलादेवी श्रीपा०। ऐं ह्रीं
श्रीं एं स्मृत्याकर्षिणी नित्याकलादेवी श्रीपा०। ऐं ह्रीं श्रीं नामाकर्षिणी
नित्याकलादेवी श्रीपा०। ऐं ह्रीं श्रीं ॐ बीजाकर्षिणी नित्याकलादे

वीश्रीपा०। ऐं ह्रीं श्रीं अं आ लाकर्षिणी नित्या कलादेवी श्रीपा०। ऐं ह्रीं श्रीं अं अ
मृता कर्षिणी नित्या कलादेवी श्रीपा०। ऐं ह्रीं श्रीं अः शरीरा कर्षिणी नित्या
कलादेवि श्रीपा०। इति पूर्वदलमारभ्य आग्नेय दलांतं पूजयेत्॥ ततो
वाग्नेयदले ऐं क्लीं सौः त्रिपुरेश्वर्यै चक्रेश्वर्यै देव्यै स्वाहा त्रिपुरेश्वरी चक्रे
श्वरी देवि श्रीपा०। ऐं ह्रीं श्रीं ह्रां ह्रीं सर्वविद्राविणी मुद्रा देवी श्रीपा०। ऐं ह्रीं श्रीं
लघिमा सिद्धि श्रीपा०। इति पूर्वोक्त प्रकारेण मुद्रा सिद्धिः पूजयेत्॥ द्रावि
णी मुद्रां प्रदर्शय एता गुप्त योगिन्यः सर्वाशापरिपूरके चक्रे समुद्राः
स सिद्धयः इत्यादिना पूजां समर्पयेत्॥ इति द्वितीयावरणं। सर्वसंक्षोभ
कचक्राय नमः। अष्टदलपद्माय नमः। इति संपूज्य ऐं ह्रीं श्रीं कं ५ अ
नंग कुसुमा देवी श्रीपा०। ऐं ह्रीं श्रीं चं ५ अनंग मेखलादेवि श्रीपा०। ३
टं ५ अनंग मदना देवी श्रीपा०। ३ तं ५ अनंग मदनातुरा देवी श्रीपा०। ३
पं ५ अनंग रेखा देवी श्रीपा०। ३ यं रं लं वं अनंग वेगिनी देवी श्रीपा०। ऐं
ह्रीं श्रीं शं षं सं हं अनंगांकुशा देवी श्रीपा०। ३ ळं क्षं अनंग मालिनी देवी
श्रीपा०। इति पश्चिमोत्तर पूर्व दक्षिण दलेषु वायव्येशाग्नेय नैरृत्य द
लेषु प्रादक्षिण्येन पूज्याः। ऐं ह्रीं श्रीं ह्रीं क्लीं सौः त्रिपुरसुंदरी चक्रेश्व
र्यै देव्यै स्वाहा त्रिपुरे चक्रेश्वरी देवी श्रीपा०। ऐं ह्रीं श्रीं क्लीं सर्वाकर्षिणी
मुद्रा देवी श्रीपा०। ऐं ह्रीं श्रीं क्लीं सर्वाकर्षिणी मुद्रा देवी श्रीपा०। ऐं ह्रीं श्रीं
महिमा सिद्धि श्रीपा०। इति नैरृत्य दलेषु पूर्ववन्मुद्रा सिद्धिः पू

जयेत्॥ ततआकर्षिणीमुद्राप्रदर्शयेत् एतागुप्तयोगिन्यः सर्वसंक्षो
भकारके चक्रे समुद्राः ससिद्धयः इत्यादिपूजां समर्पयेत्॥ इति
३० तृतीयावरणं॥ ततः सर्वसौभाग्यदायकचक्राय नमः॥ चतुर्दशा
४ रचक्राय नमः॥ इति संपूज्य। ऐं ह्रीं श्रीं टं सर्वसंक्षोभिणी देवी श्रीपा०। ऐं
४० ह्रीं श्रीं ठं सर्वविद्राविणी देवी श्रीपा०। ऐं ह्रीं श्रीं डं सर्वाकर्षिणी देवी श्री
पा०। ऐं ह्रीं श्रीं ढं सर्वाह्लादिनी देवी श्रीपा०। ऐं ह्रीं श्रीं णं सर्वसंमोहिनी
देवी श्रीपा०। ऐं ह्रीं श्रीं तं सर्वसंस्तंभनी देवी श्रीपा०। ऐं ह्रीं श्रीं थं सर्व
जृंभनी देवी श्रीपा०। ऐं ह्रीं श्रीं दं सर्ववशंकरी देवी श्रीपा०। ऐं ह्रीं श्रीं धं
सर्वरंजनी देवी श्रीपा०। ऐं ह्रीं श्रीं नं सर्वोन्मादिनी देवी श्रीपा०। ऐं ह्रीं श्रीं
पं सर्वार्थसाधनी देवी श्रीपा०। ऐं ह्रीं श्रीं फं सर्वसंपत्परिपूरणी देवी
श्रीपा०। ऐं ह्रीं श्रीं बं सर्वमंत्रमयी देवी श्रीपा०। ऐं ह्रीं श्रीं भं सर्वद्वंद्वक्ष
यंकरी देवी श्रीपा०। इति पश्चिमकोणमारभ्य नैर्ऋत्यकोणांतं पूज
येत्॥ तत्रैव हैं ह्क्लीं ह्सौः त्रिपुरवासिनी चक्रेश्वर्यै देव्यै स्वाहा॥ त्रिपु
रावासिनी चक्रेश्वरी देवी श्रीपा०। ह्रूं सर्ववशकरीमुद्रा देवी श्रीपा०।
ईशित्वसिद्धिश्रीपा०। इति पूर्ववद्देवमुद्रासिद्धिः संपूज्य सर्ववश
करीमुद्रां प्रदर्शयेत्॥ एताः संप्रदाययोगिन्यः सर्वसौभाग्यदे च
क्रे समुद्राः ससिद्धयः इत्यादिपूजां समर्पयेत्॥ इति चतुर्थावरणं॥ स ३०
र्वार्थसाधकचक्राय नमः॥ बाह्यदशारचक्राय नमः॥ इति संपूज्य ऐं
ह्रीं श्रीं कं सर्वसिद्धिप्रदे देवी श्रीपा०।

ऐं ह्रीं श्रीं खं सर्वसंपत्प्रदादेवी श्रीपा०। ऐं ह्रीं श्रीं गं सर्वप्रियंकरीदेवी श्री
पा०। ऐं ह्रीं श्रीं घं सर्वमंगलकारिणी देवी श्रीपा०। ऐं ह्रीं श्रीं ङं सर्वकाम
प्रदादेवी श्रीपा०। ऐं ह्रीं श्रीं चं सर्वदुःखविमोचनी देवी श्रीपा०। ऐं ह्रीं श्रीं छं
सर्वमृत्युप्रशमनी देवी श्रीपा०। ऐं ह्रीं श्रीं जं सर्वविघ्ननिवारणी देवी श्रीपा०।
ऐं ह्रीं श्रीं झं सर्वांगसुंदरी देवी श्रीपा०। ऐं ह्रीं श्रीं ञं सर्वसौभाग्यदादेवी
श्रीपा०। इति पश्चिमकोणादिनैर्ऋत्यांतं पूजयेत्॥ ह्रौं ह्क्लीं ह्रौः त्रि
पुराश्रीचक्रेश्वर्यै देव्यै स्वाहा। त्रिपुराश्रीचक्रेश्वरी देवी श्रीपा०। इति तत्रै
व पूजयेत्॥ सः सर्वोन्मादिनीमुद्रां श्रीपा०। वशित्वसिद्धिं श्रीपा०। इति
पूर्ववद्देवमुद्रां सिद्धिं पूजयेत्। उन्मादिनी मुद्रां प्रदर्शयेत्॥ एताः कु
लकौलयोगिन्यः सर्वार्थसाधके चक्रे समुद्राः ससिद्धय इत्यादि पु
ष्पांजलिं समर्पयेत्॥ इति पंचमावरणं॥ सर्वरक्षाकरचक्राय नमः। अंतर्द
शारचक्राय नमः। इति संपूज्य। ऐं ह्रीं श्रीं यं सर्वज्ञादेवी श्रीपा०। ऐं ह्रीं
श्रीं रं सर्वशक्तिदेवी श्रीपा०। ऐं ह्रीं श्रीं लं सर्वैश्वर्यप्रदादेवी श्रीपा०। ऐं
ह्रीं श्रीं वं सर्वज्ञानमयी देवी श्रीपा०। ऐं ह्रीं श्रीं शं सर्वव्याधिविनाशिनी दे
वी श्रीपा०। ऐं ह्रीं श्रीं षं सर्वाधारस्वरूपिणी देवी श्रीपा०। ऐं ह्रीं श्रीं सं सर्वपा
पहरादेवी श्रीपा०। ऐं ह्रीं श्रीं हं सर्वानंदमयी देवी श्रीपा०। ऐं ह्रीं श्रीं ळं सर्व
रक्षास्वरूपिणी देवी श्रीपा०। ऐं ह्रीं श्रीं क्षं सर्वेप्सितफलप्रदा देवी श्री
पा०। इति पश्चिमकोणमारभ्य नैर्ऋत्यांतं संपूज्य तत्रैव ह्रीं श्रीं ब्लूं त्रि
पुरामालिनी चक्रेश्वर्यै देव्यै स्वाहा। त्रिपुरामालिनी चक्रेश्वरी देवी श्रीपा०।
क्रों सर्वमहांकुशामुद्रां देवी श्रीपा०। प्राकाम्यसिद्धिं श्रीपा०।

मुद्रासिद्धिपूर्ववद्देवसंपूज्य महांकुशामुद्रांप्रदर्शयेत्॥ ततस्तानिग
र्भयोगिन्यः सर्वरक्षाकरेचक्रे समुद्राःससिद्धय इत्यादिपूजां समर्पये
३१ त्॥ इति षष्ठावरणं॥ ततः सर्वरोगहरचक्रायनमः। अष्टारचक्रायनमः
इति संपूज्य। ऐं ह्रीं श्रीं १ ह्ब्लूं वाशिनी वाग्देवता देवी श्रीपा०। ऐं ह्रीं श्रीं कं ५
५ कल ह्रीं कामेश्वरी वाग्देवतो श्रीपा०। ऐं ह्रीं श्रीं चं ५ क्लीं मोदिनी वाग्देवता
श्रीपा०। ऐं ह्रीं श्रीं टं ५ ह्लूं विमला वाग्देवता श्रीपा०। ऐं ह्रीं श्रीं तं ज्म्रीं अरुणा
वाग्देवता श्रीपा०। ऐं ह्रीं श्रीं पं ५ ~~[illegible]~~ ह्स्ल्मूं जयिनी वाग्देवता श्रीपा०। ऐं
ह्रीं श्रीं यं रं लं वं ज्म्रीं सर्वेश्वरी वाग्देवता श्रीपा०। ऐं ह्रीं श्रीं शं षं सं हं लं क्षं
क्ष्म्रीं कौलिनी वाग्देवता श्रीपा०। इति पश्चिमकोणादिनिरृतिकोणांतं
पूजयेत्॥ श्रीं ह्रीं सौः त्रिपुरासिद्धा चक्रेश्वर्यै देव्यै स्वाहा त्रिपुरासि
द्धा चक्रेश्वरी देवी श्रीपा०। इति तत्रैव पूजयेत्॥ ह्स्ख्फ्रें सखेचरीमुद्राद
वी श्रीपा०। ऐं ह्रीं श्रीं भुक्तिसिद्धि श्रीपा०। इति पूर्ववद्देवमुद्रासिद्धीसंपू
ज्य खेचरीमुद्रांप्रदर्शयेत्॥ ततस्तारहस्ययोन्यः सर्वरोगहरे चक्रेस
मुद्राः ससिद्धय इत्यादिपूजां समर्पयेत्॥ इति सप्तमावरणं। अष्टको
णत्रिकोणमध्यदेवताभ्यो नमः। इति संपूज्य। ऐं ह्रीं श्रीं द्रां द्रीं क्लीं ब्लूं सः यां
रां लां वां सां जंजंभनेभ्यः कामेश्वरबाणेभ्यो नमः। ऐं ह्रीं श्रीं यां रां लां वां
सां द्रां द्रीं क्लीं ब्लूं सः जंजंभनेभ्यः कामेश्वरी बाणेभ्यो नमः। ऐं ह्रीं श्रीं यं मोह
नाय कामेश्वरी चापाय नमः। ऐं ह्रीं श्रीं यं मोहनाय कामेश्वरी चापाय नमः
ऐं ह्रीं श्रीं आं आकर्षणाय कामेश्वर पाशाय नमः। ऐं ह्रीं श्रीं ह्रीं आकर्ष ३१
णाय कामेश्वरी पाशाय नमः। ऐं ह्रीं श्रीं क्रों स्तंभनाय कामेश्वरी कुशा

ऐं ह्रीं श्रीं क्रों स्तंभनाय कामेश्वरी अंकुश

य नमः। इति त्रिकोण बाह्ये देव्या वामदक्षिणक्रमेण पार्श्वद्वयेन देवदेव्यो
रायुधाष्टकं पूजयेत्। अमुकायुध देवता पादुकां पूजयामि तर्पयामि। इति
सर्वत्र पूजयेत्तर्पयेच्च।। एतदायुधावरणं नवावरणमध्ये न भवति। केषांचि
न्मते ऽष्टावरणा आयुधेति निप्रतिपादितं। अन्यथा अष्टावेवावरणानि स्युः
तस्मादायुधावरणमष्टममिति। चतुःशत्यादि मते आयुधावरणमाव
रणमध्ये न भवति। नवचक्र मध्ये अगणितत्वात् पृथक्मुद्राचक्रेश्वरीणा
मभावत्। तर्हि नवमावरणं कथमिति चेत्। सत्यं। सर्वानंदमयं देवि नवमं
चक्रनायकमित्युक्तत्वात्।। बैंदवचक्रमेवावरणरूपं। बिंदोः शिवरूप
त्वात्। शिवस्य च सर्वज्ञादिशक्तिसहितत्वात्। बिंदुरूपेण शिवेनावृता
चिच्छक्ति महात्रिपुरसुंदरीरूपा विलसती शिवाविनाभूता प्रकाशा
द्रूप्यर्थः। तेन महाबिंदुरेवावरणं भगवत्या। इति नवावरणानि। प्रक
ते शायुधानीत्येवं संपूज्य सर्वसिद्धिप्रदाय चक्राय नमः। अंतस्त्रिकोणा
य नमः। इति संपूज्य प्रथमकूटमुच्चार्य अग्निचक्रे कामगिरिपीठे मित्रे
शनाथात्मिके कामेश्वरी देवी रुद्रात्मशक्ति श्रीपा०। द्वितीयकूटमुच्चा
र्य सूर्यचक्रे जालंधरपीठे षष्ठीशनाथात्मिके वज्रेश्वरी देवि विष्ण्वात्म
शक्ति श्रीपा०। तृतीयकूटमुच्चार्य सोमचक्रे पूर्णगिरि पीठे उड्डीशना
थात्मिके भगमालिनी देवी ब्रह्मात्मशक्ति श्रीपा०। इति पश्चिमाग्नेयेशा
न कोणेषु मध्ये त्रिकोणेषु पूजयेत्। ह्सैं ह्स्क्लीं ह्सौः त्रिपुरांबा चक्रेश्व
र्यै दिव्यै स्वाहा त्रिपुरांबा चक्रेश्वरी देवी श्री पा०। इति ईशान कोणए

वसंपूजये न्नु। ह्सौः सर्वबीजमुद्रा श्रीपा०। स्वेच्छा सिद्धि श्रीपादुकां०। इति पूर्ववं
देवमुद्रासिद्धि संपूज्य बीजमुद्रां प्रदर्शयेत्। ८ ततस्तास्ततिरहस्य योगिन्य
सर्वसिद्धिप्रदे चक्रे समुद्राः सा सिद्धय इत्यादि पूजां समर्पयेत्॥ इत्यष्ट
३२ मावरणं॥ ततः सर्वानंदमय महाचक्राय नमः। बैंदव चक्राय नमः। इति सं
पूज्य समस्त मूल विद्या मुच्चार्य ब्रह्म चक्रे ॐ आपपीठे चर्यानाथ्यात्मिके
32 परब्रह्मात्म शक्ति महात्रिपुरसुंदरी देवी श्रीपा०। मीति संपूज्य। ऐं सर्वो
त्पत्तिकरिमहायोनिमुद्रा श्रीपा०। मोक्षसिद्धि श्रीपा०। इति पूर्ववद्देवमु
द्रासिद्धि संपूज्य योनिमुद्रां प्रदर्शयेत्॥ ततस्त्वा परापराति रहस्य यो
गि०नी सर्वानंदमये महाचक्रे वैंदवे परब्रह्मस्वरूपिणी परामृत शक्तिः
सर्वमंत्रेश्वरी सर्वयंत्रेश्वरी सर्वज्ञानेश्वरी सर्वयोगेश्वरी सर्वपीठेश्व
री जगदुत्पत्तिमातृका सचक्रा समंत्रा ससिद्धिः सायुधा सवाहना
सपरिवारा सर्वोपचारैः पूजिता स्तु तर्पिता स्तु नम इति पूजां सम
र्पयेत्। इति नवमावरणं॥ ततो वटुकमंत्रेण वटुकनाथ श्रीपादुकां पू
जयामि। श्रीचक्राग्नेयां योगिनीभ्यः स्वाहा सकल योगिनीचक्र श्री
पा०। नैरृत्ये महागणपति मंत्रेण महागणपतिनाथ श्रीपा०। वाय
व्ये क्षौं क्षेत्रपालाय नमः क्षेत्रपालनाथ श्रीपा०। ऐं शाने इति संपूज्यां ३२
सर्वानंदमये महाचक्रे वैंदवे परब्रह्मस्वरूपिणी परामृत शक्तिः स
र्वमंत्रेश्वरी सर्वयंत्रेश्वरी सर्वज्ञानेश्वरी सर्वयोगेश्वरी सर्वपीठेश्व।

श्रीजगदुत्पत्तिमातृकास्त्वकासमंत्रासससिद्धिः सायुधासवाहनासपरिवा
रासर्वोपचारैः पूजितास्त्व तर्पितास्त्व नमः इति पूजां समर्पयेत्॥ ततः ऐं ह्रीं
श्रीं यां रां लां वां सां कामेश्वरी इच्छाफलप्रदे जगत्क्षोभकारिके हूं हूं हूं रें
द्रां ह्रीं क्लीं ब्लूं सः त्रिपुराकामेश्वरीसमयदेवताश्रीपा० सर्वार्थसाधिनि व
ज्रेश्वरी वज्रपंजरमध्यगते क्लीं क्लिं न्नें ऐं क्रों नित्यमदद्रवे ह्रीं महावज्रेश्व
रीसमयदेवताः श्रीपा० गऐं भगभुजे भगिनि भगोदरि भगमाले भगा
वहे भगगुह्ये भगयोनि भगनिपातिनि सर्वभगवशंकरि भगरूपे नित्य
क्लिन्ने भगस्वरूपे सर्वाणि भगानि मे ह्यानय वरदे रेते सुरेते भगक्लिन्ने क्लि
न्नद्रवे क्लेदय द्रावय अमोघे भगविच्चे क्षुभ क्षोभय सर्वसत्वान् भगेश्व
रि ऐं ब्लूं जं ब्लूं भें ब्लूं मों ब्लूं हें ब्लूं हे क्लिन्ने सर्वाणि भगानि वशमानय स्त्रीं हः
क्लिं ह्रीं भगमालिसमयदेवता श्रीपा० क्लीं भगवति ब्लूं नित्या कामेश्वरी
स्त्रीं सर्वज्ञत्व वशंकरि सौः त्रिपुरभैरवि ऐं विच्चे क्लीं महात्रिपुरसुंदर्यै न
मः महात्रिपुरसुंदरि समयदेवता श्रीपा० इति समयदेवता बिंदुचक्रे
संपूज्य दशत्युत्थापनमुद्रां प्रदर्शयेत्॥ ततो मूलेन षोडशवारं संपू
ज्य संतर्प्य पूर्णाभिषेकसंयुक्तश्चेत् स्वकलानंदनाथश्रीपा० निःकला
नंदनाथश्रीपा० नवानंदनाथश्रीपा० अक्रूरानंदनाथश्रीपा० इति च
तुष्टयं स्व गुरुपूजास्थाने पूजयेत्॥ ततः सच्चिदानंदनाथपरमसं
विदंबाश्रीपा० परमसंवित्कडामहात्रिपुरसुंदरीदेवी श्रीपा० सपरार्थ

कुलानाथचक्र श्रीपा०। सपरार्ध्ये कलानाथबिंदुस्तनयुग्म श्रीपा०। सपरा
र्ध्ये कलानाथव्यंजितरेखायोनिमुद्रा श्रीपा०। इति संपूज्य कामकलामु
खार्यपरमसंविक्कलामहात्रिपुरसुंदरी देवी श्रीपा०। इति वारत्रयं पूज
३२ येत्॥ ततो गुरुममुकानंदनाथ श्रीपा०। इति वारत्रयं पूजयेत्। पूर्णा
३३ भिषेकहीनस्य कामकलापारंपर्यपूजा नास्ति। ततोऽत्र पूर्णाध्यात्वाद्दे
व्यासहाभेदा विचिंत्य वारत्रयं पूजयेत्। श्रीचक्रपश्चिमद्वारे वाराहीं वि
चिंत्य तन्मंत्रेण संपूज्य तर्प्पयेत्। समस्तप्रकटगुप्तसंप्रदायकुल
कौलनिगर्भरहस्यातिरहस्यपरापररहस्यसंज्ञक श्रीचक्रगतयो
गिनीचक्रपादुकाः पूजयामीति श्रीचक्रगतयोगिनीः पुष्पांजलिना
संपूज्य तर्प्पयेत्॥ इं इंद्रशक्ति श्रीपा०। अग्निशक्ति श्रीपा०। यमशक्ति
श्रीपा०। निर्ऋतिशक्ति श्रीपा०। वरुणशक्ति श्रीपा०। वायुशक्ति श्रीपा०।
कुबेरशक्ति श्रीपा०। ईशानशक्ति श्रीपा०। ब्रह्मशक्ति श्रीपा०। अनंतश
क्ति श्रीपा०। इति वनितारूपान्दिक्पालान्विचिंत्य दशादिक्षु पूजयेत्।
पूर्वद्वारि मातंगेश्वरी। दक्षिणद्वारि वनदुर्गा। पश्चिमद्वारि काम
उत्तरद्वारि वसंत। तत्तन्मंत्रेण पूजयेदिति केषांचित्संप्रदायः॥ ततो
धूपदीपनैवेद्यानि पूर्वोक्तप्रकारेण दत्वा तांबूलं च समर्प्य प्रसन्ना
र्घ्यं प्रसन्नपुष्पांजलिं च दत्वा पात्रपंचकं अन्नव्यंजनादिसहितमा ३३
नीय श्रीचक्रोत्तरभागे निधाय किंचिज्जलमर्घ्यपात्रस्थं कलशस्थं च
अन्नेषु निक्षिप्य धेनुमुद्रां प्रदर्श्य। ऐं ह्रीं श्रीं एह्येहि देवीपुत्र वटुक

३ अनामिकाभ्यां वटुकबलिं

कपिलपिंगल जटाभारभासुर ज्वालामुख सर्वविघ्नान्नाशय नाशय सर्वो
पचार सहितमलिपिशित सहित बलिं गृह्ण गृह्ण स्वाहा वटुकाय नमः
इति तर्जनी [illegible] दद्यात्॥ ऐं ह्रीं श्रीं यां
योगिनीभ्यः स्वाहा मध्यमानामिकांगुष्ठै योगिनी बलिं दद्यात्॥ महा
गणपतिमंत्रेण मध्यमांगुष्ठाभ्यां गणपति बलिं दद्यात्॥ ऐं ह्रीं श्रीं
क्षां क्षीं क्षूं क्षैं क्षौं क्षः स्थानक्षेत्रेसा धूपदीपादिसहितमलिपिशि
तसहित बलिं गृह्ण गृह्ण स्वाहा क्षौं क्षेत्रपालाय नमः॥ अंगुष्ठतर्जनी
भ्यां क्षेत्रपालाय बलिं दद्यात्। ॐ सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं फट्
स्वाहा सर्वांगुलीयोगेन सर्वभूतबलिं दद्यात्॥ ततो गंधपुष्पाक्ष
तान् बलिस्थाने निक्षिप्य तालत्रयपूर्वकं नाराचमुद्रया भूतान्युद्वा
सयेत्॥ यथसुखं विहरतमां रक्ष शांतिः पुष्टिस्तुष्टिश्चास्त्विति॥
ततः स्रुवजलेन शिरः प्रोक्षयेत्॥ ऐं ह्रीं श्रीं रुद्रनायै नमः। रुद्रश
क्ति पूर्वाम्नाय देवता श्रीपा० तर्पयामि नमः इति श्रीचक्रपूर्वभागे
पूजयेत्। ह्रीं रुद्राण्यै नमः रुद्राणी दक्षिणाम्नाय देवता श्रीपा० इति
दक्षिणभागे॥ ह्रीं कुब्जिकायै नमः कुब्जिका पश्चिमाम्नाय देवता
श्रीपा० इति पश्चिमभागे ख्फ्रें महाचंडयोगेश्वर सकलमहाकालसंक
र्षणी उत्तराम्नाय देवता श्रीपा० इत्युत्तरभागे पूजयेत्॥ ततः कन्यां
सुवासिनीं वा समानीं वा समानीय तस्याश्चरणौ प्रक्षाल्य गंधपु
ष्पादिभिरभ्यर्च्य तस्यै पक्वान्नं वा फलं वा संतांबूलं दत्वा देवता

बुध्य। प्रणम्य तां विसर्जयेत्॥ ततः षडंग न्यासपूर्वकं मूलविद्यास
हस्रवारं वा त्रिशतं वा एकविंशत्सु चरशतं वा जप्त्वा पुनः षडंगं विधा
३४ य गुह्यातिगुह्य गोप्त्री त्वं गृहाणास्मत्कृतं जपं। सिद्धिर्भवतु मे देवी
३५ त्वत्प्रसादात् हृदि स्थिता॥ इति देव्या दक्षिण हस्ते जपं समर्पयेत्॥ ॐ इत
स्सदितः पूर्वं प्राण बुद्धि देहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्था
सु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदु
क्तं यद्कृतं तत्सर्वं श्रीगुरुदेवतार्पणमस्तु इति ब्रह्मार्पण मं
त्रेण सर्वपरब्रह्मस्वरूपाया। श्रीच्छ कर्म महात्रिपुरसुंदर्याः पूजना
दिकं ब्रह्मार्पणं विधाय एतच्छरीरं महात्रिपुरसुंदर्यै निवेदयामी
ति स्वशरीरं समर्पयेत्॥ ततः सर्वशक्तिके मोऽद्भूत भूमेरखहेमि
कामिकां। देवस्य देवतां कां विस्मरखमयीं श्रये॥ इति नमस्कारमुद्र
या प्रणम्य रुद्रभाषित द्वादशश्लोक्या देवीस्तवीत। गणेशग्रह
नक्षत्रयोगिनी राशिरूपिणीं॥ देवीमंत्रमयीं नौमि मातृकापीठ
रूपिणीं॥१॥ प्रणमामि महादेवीं मातृकां परमेश्वरीं॥ कालहल्लो
हल्लोल्लोलकलनां शामकारिणीं॥२॥ यदक्षरैकमात्रेपि संसिद्धे
स्पर्धते सरः॥ न विताक्ष्येंदु कंदर्प शंकरानल विष्णुभिः॥३॥ यदक्षि द
रशशि ज्योत्स्नामंडितं भुवनत्रयं॥ वंदे सर्वेश्वरीं देवीं महाश्रीसिद्ध
मातृकां॥४॥ यदक्षरे महासूत्रप्रोतमेतज्जगत्त्रयं॥ ब्रह्मांडा ३४
दि कटाहांतं तां वंदे सिद्धमातृकां॥५॥ यदेकदशमाधारं बीजं

२

कोणत्रयात्मकं ॥ ब्रह्माण्डादिकटाहान्तं जगदद्यापि दृश्यते ॥ ६ ॥ अकचा
दि टतोन्नधपयशाक्षवर्गिणी ॥ ज्येष्ठाङ्गबाहुहृत्कण्ठकटिपादनिवासिनी ॥
७ ॥ नौमि बीजाक्षरोद्धारां साराक्षरतरां परां ॥ प्रणमामि महादेवीं पर
मानन्दरूपिणीं ॥ ८ ॥ अथापि यस्या जानन्ति न मनागपि देवताः ॥ केयं
कस्मात्क्व केनेति सरूपारूपभावनां ॥ ९ ॥ वन्दे तामहमक्षय्यक्षकाराक्षर
रूपिणीं ॥ देवीं कुलकलोल्लोलप्रोल्लसन्तीं परां शिवां ॥ १० ॥ वर्णानुमानयो
गेन यस्या मन्त्राष्टकं स्मृतं ॥ वन्दे तामष्टवर्गोत्थमहासिद्ध्यष्टकेश्वरीं ॥ ११ ॥
कामपूर्णजकाराख्यश्रीपीठान्तर्निवासिनीं ॥ चतुराज्ञाकोशभूतां
नौमि श्रीत्रिपुरामहं ॥ १२ ॥ इति द्वादशश्लोक्या स्तुत्वा नमस्ते नाथ भग
वन्नित्यादि पञ्चश्लोक्या गुरुं स्तुत्वा मङ्गलदीपसमानीय घृते दीपाना
पूर्य कर्पूरादि वर्त्तिकां दीपेषु निक्षिप्य प्रज्वालयेत् ॥ ॐ ज्वालामा
लिनी हुं फट् स्वाहेति मन्त्रेण मन्त्रेण पुष्पाक्षतैः दीपावलीमभ्यर्च्य धेनुमु
द्रां प्रदर्श्य ॥ समस्तचक्रचक्रेशी युते देवि नवात्मिके ॥ आरात्रिकमिदं
देवि गृहाण मम सिद्धये ॥ इति वारत्रयं पादादिमस्तकान्तं नीत्वा पुनरा
पादाग्रमानीय पुनस्तथैव भ्रामयेत् ॥ पुनर्दीपावलिं प्रणम्य नमस्का
न्विधाय दक्षिणकरानामिकाङ्गुष्ठाभ्यामर्घ्यपात्रजलैः शिरः प्रोक्षि
त्वा ॥ ऐं आत्मतत्त्वव्यापिकायै महात्रिपुरसुन्दर्यै नमः ॥ सौः शिवतत्त्व
व्यापिकायै महात्रिपुरसुन्दर्यै नमः ॥ ऐं क्लीं सौः सर्वतत्त्वव्यापिकायै म

ह्रां त्रिपुरसुंदर्यै नमः। इति मंत्रैरर्घ्यपात्रं यथास्थानमानीय पुष्पांजलिं
विधाय होमस्थलमागच्छेत्। इति पूजाविधिः॥ अथ होमविधिः॥ दीक्षा
३५. ग्निश्चेद्धार्यमाणास्ति चेत्तदामेव परिरिषेचेत्। नो चेत्कुंडे स्थंडिले वा
35 होमं कुर्यात्॥ तद्यथा॥ पंचप्रस्थमिताः सिकताः कुंडे निक्षिप्य समचतुर
स्रं यथा भवति तथा प्रसारयेत्॥ स्थंडिले चेत्पंचप्रस्थमितसिकताभि
र्हस्तमात्रं स्थंडिलं चतुरस्रं कुर्यात्॥ सिकतास्तु शुभ्राः सूक्ष्मांगारकेश
कीटास्थिनखलोष्टादिवर्जिताः प्रसार्याः। ततः कुंडे वा स्थंडिले वा कुशैः
प्रागावेनस्य मध्यतः प्रागायतां रेखां हृदयाय नम इति लिखेत्॥ रे
खं दक्षिणोत्तरयोरपि। पश्चिमे मध्ये पूर्वभागे वउदगायतां रेखां लिखेत्।
सुवर्णरजततीक्ष्णानां शलाकानामन्यतमेन शलाकेन। तदभावे व्रीहिणा
पायवेन वा यवांकुरेण वा इक्षुदंडेन वा लिखेत्॥ न तु तृणेन काष्ठेन वा श
र्करया लोहेन सीसपत्रेणादिना॥ ततः कुंडं वा स्थंडिलं वा अस्त्राय फ
डिति प्रोक्ष्य शकलं प्रक्षाल्य यथायोग्यस्थाने निदध्यात्॥ ततो वह्निं
श्रोत्रियागाराद्धाष्ट्राद्वा समानीय ॐ क्रव्यादेभ्यो नमः। इति क्रव्यादां
शं। कं चनागारं। संदंशादिना निरस्येत्। ॐ निःक्रव्यादं सेधेति वा। त
तो धेनुमुद्रयामृतीकृत्य रं वह्नये नम इति गंधाक्षतैः संपूज्य पाणिभ्यां पा
त्रस्थं गृहीत्वा वह्निं जानुस्पृष्टमहीतलः। कुंडे वा स्थंडिले वा वह्निं त्रिः परि ३५
भ्राम्य वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधयेश्चा

ये हा॥ इतिमंत्रमुच्चार्य इहसुप्रतिष्ठो भवेति प्रतिष्ठापयेत्॥ अथवा देवस्य त्वा स
वितुः प्रसव इति वैदिकमंत्रमुच्चार्य अंते भूर्भुवः स्वः ॐमिति त्रिमात्रप्रणवे
न वन्हिं प्रतिष्ठापयेत्। ततो वन्हिं शुष्ककाष्ठकलापैः समिध्य प्रज्वालयेत्।
ॐ चित्पिंगल हन दह पच पच सर्वज्ञाज्ञापय स्वाहेति मंत्रेण वन्हिं समिंधयेत्।
वर्जनीयानि काष्ठानि। कपित्थशाखोटकदेवबिल्वविभीतकश्लेष्मातक
करंजकचूतारुष्कर श्मशानस्थवृक्षकाष्ठदेवालयस्थवृक्षकाष्ठानि अन्या
न्यपि बहुकंटककाष्ठानि वर्ज्जनीयानि। ततो वन्हिं शुद्धजलैर्मंत्रेण वा मूलमं
त्रतृतीयखंडेन वा वन्हिं परिषिंचयेत्॥ दक्षिणतः प्राचीनं पश्चिमतः उदीचीनं
उत्तरतः प्राचीनं पूर्वतः समंतात् प्रदक्षिणं। अयं क्रमः सर्वत्र परिषेके। वन्हेरु
त्तरतः प्रागग्रान्दर्भानास्तीर्य तत्र पात्राणि आसादयेत्॥ आज्यस्थालिं स्रुवं
प्रोक्षणीपात्रमिति होमद्रव्यं समानीय स्थापयेत्॥ होमद्रव्याणि। आज्यं तिला
स्तंडुलास्तिलतंडुलाः पायसं चेति पंचद्रव्याणि नित्यहोमे प्रशस्तानि। अभावे
अन्यान्यपि यवोदनसक्तुफलादीनि ग्राह्याणि यथासंभवं। ततः प्रोक्षणपा
त्रमुत्तानं कृत्वा लौकिकैर्जलैः प्रोक्ष्य तस्मिन्नुदीचीनाग्रं पवित्रं निदध्यात्॥ प
वित्रकरणविधिरयं। दर्भद्वयं साग्रं द्विगुणीकृत्य अग्रभागं प्रदक्षिणं परिवेष्ट
ग्रंथिं कुर्यात्॥ ततः प्रादेशमात्रं प्रमाय मूलभागं छिंद्यात्॥ ततो जलेन संसि
च्य प्रोक्षणीपात्रे निदध्यात्॥ ततः पवित्रसहितप्रोक्षणीपात्रे जलमानीय द
क्षिणवामकरयोः अंगुष्ठानामिकाभ्यां पवित्रस्य मूलाग्रे धृत्वा त्रिरुत्पवनी

यात्॥ जलमध्याद्दूर्ध्वं त्रिपवित्रं नयेद्विसर्ग्यः॥ वामकरे प्रोक्षणीं गृहीत्वा दक्षि
णकरेण पात्राण्युत्तानानि कृत्वा त्रिः प्रोक्षेत्॥ आज्यस्थालीमानीय वह्नेः
३९ पश्चिमभागे॥ निधाय प्रोक्षणीस्थपवित्रं तस्यामुदगग्रं निधाय तस्यामाज्यं
निधाय आज्यं गव्यमेव होमेषु मुख्यं॥ तदभावे माहिषं। तस्याप्यभावे आजं
३० तस्याप्यभावे मैषं वा॥ तस्याप्यभावे गोक्षीरं एतन्नित्यहोमे। काम्ये गव्यमेवा
ज्यं मुख्यं। माहिषमपि केचनेच्छंती नान्यत्॥ वह्नेर्वायव्यभागे अंगारान्निधा
य तेष्वाज्यस्थालीमधिश्रयेत्॥ दर्भयुगलं प्रज्वाल्य आज्ये दर्शयित्वा तद्दर्भ
युगलं निरस्य जलं स्पृशेत्॥ दर्भान्पुनः प्रज्वाल्य आज्यस्थालीं त्रिः पर्य
ग्निकुर्यात्॥ होमद्रव्यैः सह। दर्भान्निरस्याप उपस्पृश्य आज्यस्थाल्यधिश्रिता
नंगारानग्नौ निक्षिपेत्॥ आज्यस्थालीमुदग्गृह्णास्य दर्भान्वह्नेः पश्चाद्बर्हि
या नास्तीर्य तेष्वाज्यस्थालीं निधाय पूर्ववत्पवित्रं गृहीत्वा दाज्यमध्यात्सव्या
त्पश्चाद्आज्यमध्ये एवानीय पुनः आज्यस्यांतर्पर्यंतं नीत्वा पुनरामध्यमानी
य आज्यात्पवित्रमुद्धरेत्॥ अयमेकः पुनराहारः एवं पुनराहारत्रयेणाज्यो
त्पवनं कुर्यात्॥ सर्वत्रायं विधिराज्यसंस्कारे। पवित्रं विस्रस्य प्रोक्ष्य वह्नौ क्षि
पेत्। स्रुक्स्रुवौ वामदक्षिणयोर्गृहीत्वा त्रिरग्नौ निष्टप्य स्रुवं दर्भेषु निधाय
वामकरे स्रुवं गृहीत्वा दक्षिणकरे दर्भानावेष्ट्य दर्भाग्रैः स्रुवस्य बिलं दर्भ
मध्यैर्दंडस्य पृष्ठमूलमारभ्य बिलपृष्ठभागपर्यंतं त्रिः संमार्जयेत्॥ अयं क्र
मः सर्वत्र स्रुक्स्रुवसंमार्जने। ततो दर्भानद्भिः संस्पृश्याग्नौ क्षिपेत्। ततः
समिद्भिस्तुष्टयं प्रोक्षितं वामकरे गृहीत्वा स्रुवेणाज्यमादाय समिद्भिस्तुष्ट ३६
यमामूलाग्रमभ्यज्य मूलमंत्रेण वा मूलमूलमंत्रतृतीयखंडेन वा केव

लहु स्रुवपात्राग्रभावेन वा परिषिंच्य गंधपुष्पाक्षतैर्वह्निमर्चयेत्॥ॐ
अग्नये जातवेदसे नमः।ॐ अग्नये सप्तजिह्वाय नमः।ॐ अग्नये हव्यवाह
नाय नमः ॐ अग्नये कौमारतेजसे।ॐ अग्नये वैश्वानराय।अग्नये अश्वो
दरजाय।अग्नये विश्वमुखाय।अग्नये देवमुखाय नमः।पूर्वादितः।ततः
प्रजापतिं मनसा ध्यायन् अग्नौ स्वाहाकारं मनसैवोच्चरन् समिधो निक्षिपे
त्।केवलाज्यहोमे एकैव समित्प्रक्षेपणीया॥आज्यस्थालीस्थमाज्यं धे
नुमुद्रयामृतीकृत्य स्रुवेणाज्यमादाय व्याहृतिचतुष्टयं जुहुयात्॥वै
श्वानरमंत्रेण अग्नये सायुधाय सपरिवाराय सवाहनाय नमः।इति पु
ष्पांजलिं विधाय स्यूं हिरण्यायै स्वाहा॥ष्यूं गगनायै स्वाहा श्यूं रक्तायै स्वा
हा॥श्रूं कृष्णायै स्वाहा॥ल्यूं सुप्रभायै स्वाहा॥व्यूं बहुरूपायै स्वाहा॥र्यूं
अतिरक्तायै स्वाहा॥इति पूर्वोक्त जातवेदः प्रभृतिभिरष्टमूर्तिभिरष्टाबा
हुतीर्जुहुयात्॥आं सहस्रार्चिषे हृदयाय नमः।ईं स्वस्तिपूर्णाय शिरसे
स्वाहा।ऊं उत्तिष्ठपुरुषाय शिखायै वषट् स्वाहा।ऐं धूमव्यापिने कवचा
य हुं स्वाहा।औं सप्तजिह्वाय नेत्रत्रयाय वौषट् स्वाहा।अः धनुर्धराय
अस्त्राय फट् स्वाहा॥इति जिह्वामूर्त्यंगमंत्रैर्हुत्वा वह्निरूपां देवीं ध्यात्वा
नवमुद्राः।प्रदर्श्य पंचोपचारैरभ्यर्च्य मूलेन वह्निदेवतयोरैक्यं चिंतयन्ने
काहुतित्रयं जुहुयात्।ततो मूलेन षोडशाहुतीर्हुत्वा कामेश्वर्यादिचित्रां
तनित्यामंत्रैरेकैकामाहुतिं जुहुयात्॥तिथिनित्यामंत्रेणैकामाहुतिं हु

त्वा अणिमादिपरिवारदेवताभ्य एकैकामाहुतीं जुहुयात्॥ चतुर्थ्यंतना
ममंत्रैः। अणिमादिसिद्धये स्वाहा इत्यादिप्रकारेण तत्तच्चक्रेश्वरीभ्योपि प
परमशिवनाथादिभ्योपि। स्वगुरुवे एकाहुतिरंते होतव्या॥ वटुकयोगिनी
३७ महागणपतिक्षेत्रपालभूतेभ्योपि एकैकाहुतिः कर्तव्या॥ एवं विधाय स्रु
37 चि चतुर्गृहीतेन मूलमंत्रेण देवतां ध्यायन् तन्मुखे पूर्णाहुतिं जुहुयात्॥
ततः पूर्वोक्तरीत्या वह्निं परिषिच्य देवतां स्वचर्यात्मनि निवासयेत्॥ एवं
कर्तुमसक्तः सन् वह्निप्रतिष्ठादिपुष्पांजलिपर्यंतं विधाय वह्निदेवतारू
पं ध्यात्वा समस्तचक्रगुलगुलतरसंप्रदायकुलकौलनिगर्भरहस्या
तिरहस्यसंज्ञकाभ्यः श्रीचक्रदेवताभ्यो नमः इति पुष्पांजलिं विधाय वह्नि
देवतयोरैक्यं चिंतयन् मूलेनाज्याहुतित्रयं हुत्वा यथासंभवहोमद्र
व्यैर्मूलेन षोडशाहुत्वा कामेश्वर्यादिनित्याभ्य एकैकाहुतिं जुहुयात्॥ ति
थिनित्यायै काहुतिः कार्या॥ आत्माष्टाक्षरमंत्रेण भूतमंत्रैश्चैकैकाहुतिः॥
अथवा कामेश्वर्यादिपंचदशनित्याभ्यः स्वाहेति हुत्वा तिथिनित्याभ्यश्च
हुत्वा परमशिवनाथाद्यशेषगुरुभ्यो न[illegible] स्वाहेति हुत्वा गुरवाएकाहुति
र्देया॥ त्रैलोक्यमोहनचक्राय स्वाहा॥ बाह्यचतुरस्रदेवताभ्यो अणिमादि
शक्तिदेवताभ्यः स्वाहा॥ मध्यचतुरस्रदेवताभ्यो ब्राह्म्यादिदेवताभ्यः
स्वाहा॥ अंतश्चतुरस्रदेवताभ्यः सर्वसंक्षोभिण्यादिमुद्रादेवताभ्यः स्वा ३८
हा॥ सर्वसंक्षोभकचक्राय स्वाहा सर्वसंक्षोभकचक्रदेवताभ्यः अनं
गकुसुमादिभ्यः स्वाहा सर्वसौभाग्यदचक्राय स्वाहा॥ सर्वसौभाग्य

द्रचक्रदेवताभ्यः सर्वसंक्षोभिण्यादिशक्तिभ्यः स्वाहा॥ सर्वरक्षाकरच
क्रायस्वाहा। सर्वार्थसाधकचक्रायस्वाहा॥ सर्वार्थसाधकचक्रदेवताभ्यः
सर्वसिद्धिप्रदाशक्तिभ्यः स्वाहा॥ सर्वरक्षाकरचक्रदेवताभ्यः सर्वज्ञादि
शक्तिभ्यः स्वाहा॥ सर्वरोगहरचक्रायस्वाहा॥ सर्वरोगहरचक्रदेवताभ्यो
वशिन्यादिवाग्देवताभ्यः स्वाहा॥ अष्टकोणत्रिकोणमध्यदेवताभ्यः का
मेश्वराद्यष्टायुधदेवताभ्यः स्वाहा॥ सर्वसिद्धिप्रदचक्रायस्वाहा॥ कामेश्व
र्यादिसर्वसिद्धिप्रदचक्रदेवताभ्यः स्वाहा॥ सर्वानंदमयचक्रायस्वाहा॥
सर्वानंदमहाचक्रे बैंदवपरब्रह्मस्वरूपिण्यैपरामृतशक्त्यै सर्वमंत्रेश्वर्यै
सर्वपीठेश्वर्यै सर्वयोगेश्वर्यै सर्वज्ञानेश्वर्यै जगदुत्पत्तिमातृकायैसचक्रायै
समंत्रायैससिद्ध्यैसमुद्रायैसायुधायैसवाहनायैसपरिवारायैस्वाहेति
हुत्वा॥ बटुकादिबलिदेवताभ्यः स्वाहेतिहुत्वा॥ अग्नयेस्विष्टकृतयेस्वाहे
तिहुत्वा न्यूनातिरिक्तप्रायश्चित्तार्थं व्याहृतिभिर्हुत्वा प्रणवेन चाहुतित्रयं
हुत्वा इतः पूर्वमित्यादिब्रह्मार्पणमंत्रेण स्वाहांतेनहुत्वा स्रुचिचतुर्गृही
तेनपूर्णाहुतिं दत्वा होमशेषं पूर्ववद्देवपरिषेकादिनः समापयेत्॥ एवमपि
कर्तुमशक्तः स्थंडिलादिविधाय वह्निं प्रतिष्ठाप्य पुष्पांजलिदानांतं वि
धाय देवतारूपं वह्निं ध्यात्वा पंचोपचारैरभ्यर्च्य नवमुद्राः प्रदर्श्य मूलेन
षोडशाहुतीर्हुत्वा कामेश्वर्यादिनित्याभ्यः स्वाहेतिहुत्वा तिथिनित्यायै चै
कामाहुतिं हुत्वा परमशिवानाथाद्यशेषगुरुभ्यः स्वाहेतिहुत्वा स्वगुर
वे चैकामाहुतिं हुत्वा समस्तप्रकटेति समग्रमंत्रेण स्वाहांतेनहुत्वा॥ पू

३८

र्णाहुतिं जुहुयात्॥ न्यूनातिरिक्तदोषशांत्यै व्याहृतिभिर्हुत्वा॥ प्रायश्चित्तेन हु
त्वा कर्म समापयेत्॥ अथवा देवं विधाय वैश्वदेवाग्निं देवतारूपं ध्यात्वा प
रिषिंच्य वह्निदेवतयोरभेदं विचिंत्य पुष्पांजलिं विधाय। आज्यमानीय धे
नुमुद्रया ऽमृतीकृत्य मूलेन वारत्रयमभिमंत्र्य षोडशाहुतीर्मूलेन जुहुया
त्॥ ततः समस्त प्रकट इत्यादिना समग्रमंत्रेण हुत्वा गुरुवे एकाम् आहुतिं हु
त्वा अग्न्यर्पणमंत्रेण हुत्वा वह्निरूपां देवीमात्मनि समारोपयेत्॥ इति संक्षे
पतो नित्यहोमविधिः॥ ततः पूजास्थानमागत्य पंचमुद्राः पुरःसरं देवी
प्रणम्य खेचरीमुद्रां विधाय देवि देवि जगन्नाथे हृदये मम निर्मले। यागदे
शात् समागत्य निवासं कुरु शांकरि॥ इति देवीमात्मनि निदध्यात्॥ तत
उत्तरभागे पूर्वमेकस्थापितबलिपात्रादन्नमुद्धृत्य कुरुकुल्ले स्वाहा॥ ॐ
कुरुकुल्लायाः स्वाहा॥ कुरुकुल्ले ॐ कुरुकुल्लौ विघ्नां चतुर्धा विभाज्य च
तुर्भिर्मंत्रैश्चतुर्दिक्षु बलिं दद्यात्॥ श्रीचक्र चतुर्दिक्षु दद्यादिति केषां
चित्संप्रदायः॥ ततो यथासुखं [illegible] विहरं तं मयि तिष्ठ मां रक्ष शांतिः पु
ष्टिश्चास्त्विति भूतानि उद्वास्य शुद्धजलैः शिरः प्रोक्षेत्॥ ततो ऽर्घ्यपात्र
मुद्धृत्य वामकरतले निधाय ऐं ह्रीं श्रीं अमुकानंदनाथश्रीपादुकां पू
जयामि तर्पयामीति संपूज्य तर्प्य देवीमात्महृदये विभाव्य मूलेन महा
त्रिपुरसुंदरीदेवीं पूजयामि तर्पयामीति संपूज्य संतर्पयेत्॥ अर्घ्य ३८
पात्रोदकं पात्रांतरे निनीय अर्घ्यपात्रं यथास्थानं निधाय। तज्जलं
प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनी स्रुवा धर्माधर्मककलास्ने

ग. पू. ः ह्रीं मम सर्वजनं वशमानय क्लीं स्वाहेति पंसवर्तिं साल
ऋ भरकुरुकुल्लौ +

हृत्पूर्णं विमेधोजुहोम्यहं स्वाहेति प्राश्नीयात् ॥ कलशास्थ जलमप्यवशिष्टं
प्राश्नीयात् ॥ ततोऽर्घ्यपात्रे पुष्पाक्षतान् दत्वा । क्लीं भगनि वूंनियाका
मेश्वरी स्त्रीसत्वं वशं करि सोऽस्त्रिपुरभैरवि देवि द्रौं क्लीं महात्रिपुरसुंदर्यै
नमः इति पूजां प्रतिष्ठाप्य नवविद्यामेकादशवारं जपेत् ॥ पंचवारं वा ॥ वा
रत्रयं वा ॥ ततः पूजानिर्माल्यं क्लीं नमः उच्छिष्ट भागिनी मातंगि सर्वज
नवशंकरि स्वाहेति लघुमातंगी विद्यया उत्तरभागे दद्यात् ॥ नैवेद्या
दपि किंचिदुद्धृत्य दद्यात् ॥ ततो गुरुं प्रणम्य निर्माल्यचंदनपुष्पाक्षता
न् स्वयं धृत्वा कृतकृत्यो यथासुखं विहरेत् ॥ यथाविभवं देवीभक्ता
न्विप्रान्मधुरप्रायं भोजयेत् ॥ कन्यकाः सुवासिनीश्च । तैः सह सुखं भु
ञ्जीत ॥ एवं पूजां कुर्वन्सर्वसंपदमाप्नोति । प्रत्यहं करणाशक्तः पंचसु
पर्वसु कुर्यात् ॥ महानवम्यादिषु विशेषतः कुर्यात् । ये निंदकास्ते वि ल
यं प्रयांतु । ये साधकास्ते प्रभवंतु सिद्धाः । प्राणव्यपाये करुणावलो
कात्पुरः परेशी मम संनिधत्तां ॥ इति ब्राह्मणभोजनांते प्रार्थयेत् ॥ इ
ति पूजाप्रकरणं ॥ अथ मुद्रालक्षणमभिधीयते । अन्योन्यकरभ
श्लिष्टौ कृत्वा हस्तौ प्रसारयेत् ॥ अंगुलीसंहतौ यानाऽङ्गुष्ठाग्रे कनि
ष्ठयोः कुर्वीत संलग्ने मुद्रैषा वाहनी मता ॥ अन्योन्यतल संश्लिष्टौ
कृत्वा हस्तावनामिके ॥ व्यस्तस्य कुटिलाग्राभ्यां तर्जनीभ्यां निपीड
येत् ॥ एषा त्रि खंडमुद्रा स्यात्त्रिपुराह्वानकर्मणि । पूर्वोक्ता वाहनी

मुद्रास्थापनीस्यादधोमुखी॥ ऊर्द्ध्वांगुष्ठयोर्मुष्टी संयुक्तौ सन्निधा
३९ पनी॥ गर्भकृतांगुष्ठमुष्टिसंपुटौ सन्निरोधिनी॥ बहिरंगुष्ठयोगे
न बद्धमुष्ट्यप्रसारयेत्॥ तर्जन्योर्भ्रामयेत्सम्यग्द्वयोर्योर्ध्वोर्ध्वौ तकौ स
३१ व्याप सव्यकमतो मुद्रेयमवगुंठिनी॥ तिर्यक्प्रसारितांगुष्ठोप्यंजलिः
प्रार्थनी मता॥ अन्योन्यकरसंश्लिष्टौ करौ विरलमुष्टिकौ॥ कृत्वाधः
सारयेत्सम्यक्तर्जन्यौ सरलीकृते। एषा संक्षोभिणी मुद्रा प्रथमावर
णे मता॥ एषैव द्राविणी मुद्रा संप्रसारितमध्यमा॥ इयमाकुंचिताग्र
स्यान्मुद्राकर्षणकारिणी॥ विधाय ग्रंथितौ हस्तावन्योन्यांगुलिसंधि
षु॥ अंतर्मुखौ ततोंगुष्ठ तर्जन्यौ कुंडलाकृती॥ रचयेत्कथितामुद्रा स
र्वसौभाग्यदायिनी॥ अन्योन्यकरसंश्लिष्टौ विधाय विततौ करौ॥ कृत्वा
कनिष्ठे व्यस्ते मध्यमाभ्यां निपीडयेत्॥ तर्जन्यनामिकायाविप
र्यांकारेण योजयेत्॥ कुर्यादूर्ध्वमुखांगुष्ठौ संश्लिष्टौ मध्यमाग्रयोः॥
इयमुन्मादिनी मुद्रा पंचमावरणेक्षिता॥ इयमांकुचिताग्रस्यान्मुद्रा
सर्वमहांकुशा॥ विधायोर्ध्वमुखौ बाहू वेष्टयेद्द्वौ रुधा विवा। अनामि
के कनिष्ठेन व्यत्यस्ते परिपीडयेत्॥ मध्यमापृष्ठसंलग्ने तर्जनीभ्यां प
थक्पृथक्॥ अन्योन्यं योजयेत्सम्यग्द्वये मध्यमयोरपि॥ मध्ये ज्योम ३९
मावृतौ॥ कृत्वा ताना नौ करौ श्लिष्टकरन्मौ विस्तृतांगुली॥ दक्षिणा
धोमयो वामं व्यस्तस्ये वकनिष्ठिके॥ व्यत्यस्यानामिके तद्वन्नासा

गुपरिविन्यसेत्॥ मध्यमे संयुतावेव तर्ज्जन्या वांकुशाकृती॥ मध्यमापार्श्व संलग्ने विधायोर्ध्वमुखौ ततः॥ अंगुष्ठौ रचयेद्धि जमुद्रेयं परिकीर्तिता॥ विधायग्रथितौ हस्तावन्यान्यांगुलिसंधिषु॥ तर्जनीभ्यां निगृह्णीयाद्धसस्यानामिकाद्वयं॥ संयोऽप्यागे मध्यमयोर्योन्याकारं प्रकल्पयेत्॥ योनिर्मध्यगतं कुर्यात्कनिष्ठसरलेयुते॥ अंगुष्ठाग्रे युते युज्यात्कनिष्ठामध्यपर्वणोः॥ योनिमुद्रेयमाख्याता गोपनीया हि साधकैः॥ विधायोर्ध्वमुखं हस्तं दक्षिणं संहतांगुलिं तर्ज्जनीं कुटिलां कुर्यादामध्यान्मध्यमांगुलेः॥ वक्रमनामिकं कुर्यात्स्रुवतुंडनिभां ततः॥ इयमंकुशमुद्रा स्याद्गनाकर्षणे मता॥ वरं गुष्ठं संन्नधो मुष्टीकृत्य प्रसारयेत्॥ तर्ज्जन्यौ कर्णपर्यंतमाकर्षे दक्षिणां पुनः॥ तर्ज्जनीमितरां तिर्यग्गजुं वा कुंचसारयेत्॥ एषा नाराचमुद्रा स्याद्भूतोत्थाने नियोजिता॥ अन्योन्यग्रथितौ हस्तौ कुर्यादंगुलिसंधिषु॥ उर्ध्वाग्रे तर्ज्जनी द्वंद्वं संश्लिष्टं रचयेत्सुधीः॥ शान्त्युत्थापनमुद्रेयं देवतातोषकारिणी॥ भुजावूर्ध्वमुखौ कृत्वा विरुधावितवेष्टयेत्॥ पश्चाद्धिरचयेन्मुद्रां ता त्त्युत्थापनसंज्ञकं॥ स्यान्नमस्कारमुद्रेयं कार्या देव्या नमस्कृतौ॥ अन्योन्यग्रंथितौ हस्तौ विधायांगुलिसंधिषु॥ व्यस्तयोर्मध्यमयोस्तर्ज्जन्यौ योजयेद्दृजू॥ व्यस्तव्यस्तानामिकाद्वंद्वे कनिष्ठे योजयेद्दृजू॥ एषा चतुस्तनाकारा धेनुमुद्रा प्रकी

तिता ॥ कॅ निबद्धौ ग्रथितौ कृत्वा करौ तु परिवर्त्तयेत् ॥ संश्लिष्टं तर्जनीयु
ग्मं ऋजु कृत्वा प्रसारयेत् ॥ अनामिके मध्यमे च तिर्यगाकुंच्य सारये
४० त् ॥ कुर्याद्दधोमुखांगुष्ठौ मुद्रैषा गारुडी मता ॥ प्रसारितांगुली कुर्याद्भू
५० मिस्पर्शितलौ करौ ॥ अन्योन्यांगुष्ठसंश्लिष्टौ मुद्रेयं विननामता ॥ दक्षि
णोर्ध्वक्रमेणैव व्यत्यस्य स्वस्तिकीकृतौ ॥ हस्तौ स्वस्तिकमुद्रेयं द्वितीया
परिकीर्तिता ॥ भूमिस्पृष्टतलौ वामे हस्ते दक्षिणहस्तकं ॥ निधाय पाणि
युग्मस्य पृष्ठे उन्नामयेत्ततः ॥ इयं कमठमुद्राख्या तृतीया परिकीर्तिता ॥
अंतर्गूढांगुष्ठमुष्टी संश्लिष्टौ मुष्टिमुद्रिका ॥ योनिमुद्रा पूर्वमुक्ता पंच
मी परिकीर्तिता ॥ एताभिः पंचमुद्राभिः प्रणमेत्परदेवतां ॥ उत्तानाधो
मुखौ हस्तौ धिदध्याद्वामदक्षिणौ ॥ ग्रंथितौ तु ततः कुर्यादन्योन्यांगुलि
संधिषु ॥ परिवर्त्यकरौ पश्चात्तर्जन्यौ संप्रसारयेत् ॥ संश्लिष्टे कथिता मु
द्रा संहाराख्या विचक्षणैः ॥ इयं सर्वत्र पूजा सु सर्वसाधारणी मता ॥ ततः
खेचरीं मुद्रां कृत्वा तामुपसंहरेत् ॥ तर्जनीमध्यमांगुष्ठयोगात्प्राणाख्य
मुद्रिका ॥ मध्यमानामिकांगुष्ठयोगेनापानसंज्ञका ॥ कनिष्ठानामिकांगु
ष्ठयोगेन व्यानमुद्रिका ॥ कनिष्ठांगुष्ठतर्जन्योर्युक्ताद्दानमुद्रिका ॥ मुद्रा
सर्वांगुलिसंयोगात् समानाख्या प्रकीर्तिता ॥ एताः पंचविधा मुद्रा नैवे
द्यादौ योजयेत् ॥ व्यानमुद्रे करद्वंद्वं कृत्वा न्योन्य प्रबंधयेत् ॥ तर्ज्जनी ४०
मध्यमाग्राणि योजयित्वा प्रकल्पयेत् ॥ योन्याकारं भवेन्मुद्रा गालि
न्यर्घ्यांबुशोधिनी ॥ अधोमुखे दक्षहस्ते कृत्वोत्तानमदक्षिणं ॥ विन्य

स्यो न्यो न्य तर्जन्यो कनिष्ठानामिकांतरे॥ अन्योन्यस्य च विन्यस्य मध्यमा चाप्य
नामिके॥ अन्यो न्यांगुष्ठ तर्जन्यो विन्यसेद् अंतरालयोः॥ महिपूरिं छिद्र मुद्रेयं
गालिनी मता॥ केषांचिन्मत एवं स्यां कुरु वा चात्र निर्णयः॥ एषैव वीक्षणी मु
द्रा कर्त्तव्यार्घ्यांबु वीक्षणे॥ मुद्रा अत्रोप योगिन्यः सर्वाः सम्यक् समीरिता॥
शांख चक्रादयो मुद्रा वैष्णवा याग मोदिताः॥ प्रकृतानुपयोगित्वान्ने हैं अंथे
प्रकाशिताः॥ इति वरिवस्या रहस्यं॥ अथ श्रीगुरु नाथ श्रीदेवतात्मने न
मः॥ ऐं क्लीं श्रीं हंसः शिवः ह्सौः सोहं अंग्र पंचरूपायै पृथ्व्यै नमः॥ ऐं १० आं द्वी
प रूपायै मायायै नमः॥ ऐं १० इं जलरूपायै कमलायै नमः॥ ऐं १० गिरिरूपा
हृ यै विष्णुवल्लभायै नमः॥ ऐं १० उं पर्वतरूपायै पद्मवासिन्यै नमः॥ ऐं १० ऊं पीठ
रूपायै समुद्रतनयायै नमः॥ ऐं १० ऋं क्षेत्ररूपायै लोकमात्रे नमः॥ ऐं १० ॠं व
नरूपायै कमलवासिन्यै नमः॥ ऐं १० ऌं आश्रमरूपायै इंदिरायै नमः॥ ऐं १० ॡं
गुहारूपायै मायायै नमः॥ ऐं १० एं नदीरूपायै रमायै नमः॥ ऐं १० ऐं चत्वररू
पायै पद्मायै नमः॥ ऐं १० ॐ उद्भिज्जरूपायै नारायणप्रियायै नमः॥ ऐं १० औं
स्वेदजरूपायै सिद्धरूपायै नमः॥ ऐं १० अं अंडजरूपायै राजलक्ष्म्यै न०॥
ऐं १० अः जरायुजरूपायै महालक्ष्म्यै न०॥ ऐं १० कं लवरूपायै आर्यायै
न०॥ ऐं १० खं त्रुटिरूपायै उमायै नमः॥ ऐं १० गं कलारूपायै चंडिकायै न०॥ ऐं १०
घं काष्ठारूपायै दुर्गायै न०॥ ऐं १० ङं निमेषरूपायै शिवायै न०॥ ऐं १० चं श्वास
रूपायै अपर्णायै न०॥ ऐं १० छं घटिकारूपायै अंबिकायै न०॥ ऐं १० जं मुहूर्त
रूपायै सत्यायै न०॥ ऐं १० झं प्रहररूपायै ईश्वर्यै न०॥ ऐं १० ञं दिवसरूपायै शांभ

७ मंखुंगारूपायै गौर्ह्यैनम मंप्रज्ञेयरूपायै भवान्यैनम:
मव्येन ०॥ ऐं १० टं संध्या रूपायै ईशान्येन ०॥ ऐं १० ठं रात्रि रूपायै पार्वत्येन ०॥
ऐं १० डं तिथि रूपायै सर्वमंगलायै ०॥ ऐं १० ढं वाररूपायै दाक्षायण्येन ०॥
ऐं १० णं नक्षत्र रूपायै हैमवत्येन ०॥ ऐं १० तं योगरूपायै महामायायेन ०॥
ऐं १० थं करणरूपायै महैश्वर्यै नम:॥ ऐं १० दं पक्षरूपायै मृडान्येन ०॥ ऐं १०
धं मासरूपायै रुद्राण्येन ०॥ ऐं १० नं राशि रूपायै शर्वाण्येन ०॥ ऐं १० पं ऋ
तुरूपायै परमेश्वर्यैन ०॥ ऐं १० फं अयनरूपायै काल्येन ०॥ ऐं १० बं वत्सर
रूपायै कात्यायिन्येन ०॥ ऐं १० भं युगरूपायै ब्राह्मण्येन ०॥ ऐं १० मं पंचत
न्मात्रारूपायै वागेश्वर्यैन ०॥ ऐं १० यं पंचकर्मेंद्रियरूपायै वाण्यै ०॥ ऐं १०
रं पंचज्ञानेंद्रियरूपायै सावित्र्यै ०॥ ऐं १० लं पंचप्राणरूपायै सरस्वत्यै ०॥
ऐं १० वं गुणत्रय रूपायै गायत्र्येन ०॥ ऐं १० शं अंत:करणचतुष्टयरूपा
यै ०॥ ऐं १० षं अवस्थात्रयरूपायै विद्यात्मिकायै नम:॥ ऐं १० सं सप्तधातुरू
पायै भारत्येन ०॥ ऐं १० हं दोषत्रय रूपायै पंचव्यापकरेंद्रियै अथ भुवनन्या
स:॥ ऐं १० अं आं इं अतललोक निलय शतकोटि गुह्यासयोगिनीमूलदे
वता युताधारं शानंदेव वादेव्यै नम: पादयो:॥ ऐं १० ईं उं ऊं वितललोक निलय शत
कोटि गुह्यतरानंतयोगिनी मूलदेवता युताधार शानंदेव वादेव्यै नम: गुल्फ
यो:॥ ऐं १० ऋं ॠं लृं सुतललोक निलय शतकोटि अतिगुह्याचिंत्ययो
गिनी मूलदेवता युताधार शानंदेव वादेव्येनम: जंघयो:॥ ऐं १० लॄं एं ऐं महा
तललोक निलय शतकोटि महागुह्य स्वतंत्र योगिनी मूलदेवता युताधा ४१
र शानंदेव वादेव्येन ० जानुनो:॥ ऐं १० ओं औं तलातललोक निलय शतकोटि प

अंआदिरादिगोप्यतमसकलप्रपंचाधिपायै परादेव्यो वाचेनम इति आपकं

रमगुप्तनरानंतयोगिनीमूलदेवतायुधोनोरशाक्त्यंवादेव्यैनमः।ऊर्वोः। ह
ऐं१०अंअः रसातललोकनिलयशतकोटिरैस्यशानयोगिनीमूलदे
वतायुनाधारशाक्त्यंवादेव्यैनमः।गुह्ये।ऐं१०कं५पाताललोकनिलय
शतकोटिरहस्यनरकिणायोगिनीमूलदेवतायुनाधारशाक्त्यंवादेव्यै
नमः।मूलाधारे।।ऐं१०वं५भूर्लोकनिलयशतकोटिअतिरहस्यडाकि
नीयोगिनीमूलदेवतायुनाधारशाक्त्यंवादेव्यैनमः।स्वाधिष्ठाने।।ऐं१०टं५
२ भुर्वोलोकनिलयशतकोटिअतिरहस्यडाकिनीयोगिनीमूलदेवतायु
नाधारशाक्त्यंवादेव्यैनमः।मणिपुरे।।ऐं१०तं५स्वर्गलोकनिलयशतको
टिपरमरहस्यलाकिनीयोगिनीमूलदेवतायुनाधारशाक्त्यंवादेव्यैनमः
अनाहते।।ऐं१०पं५महर्लोकनिलयशतकोटिगुप्तकाकिनीमूलदेव
तायुनाधारशाक्त्यंवादेव्यैनमः।विशुद्धौ।।ऐं१०यं४जनलोकनिलयश
तकोटिगुप्ततरशाकिनीयोगिनीमूलदेवतायुनाधारशाक्त्यंवादेव्यै
नमः।।आज्ञायां।।ऐं१०हां४तपोलोकनिलयश तकोटिअतिगुप्तहा
किनीयोगिनीमूलदेवतायुनाधारशाक्त्यंवादेव्यैनमः।भाले।।ऐं१०लंक्षं
सत्यलोकनिलयशतकोटिमहागुप्तयाकिनीमूलदेवतायुनाधारशाक्त्यं
वादेव्यैनमः।ब्रह्मरंध्रे।।ऐं१०अंआंक्षंपर्यंतंसमस्तगुह्यायचतुर्दशभु
वनाधिपायैशाक्त्यंवादेव्यैनमः इतिव्यापकं।।इतिभुवनन्यासः।।ऐं१०अं
केशवअक्षराभ्यांनमः।शिरसि।।ऐं१०आंनारायणआद्याभ्यांनमः

मुखे॥ ऐं १ इं ईं माधवइन्दिराभ्यां नमः दक्षिणस्कंधे॥ ऐं १ उं ऊं गोविंदईश्वरा-
नाभ्यां नमो वामस्कंधे॥ ऐं १ ऊं विष्णुउग्राभ्यां नमः दक्षिणपार्श्वे॥ ऐं १ ऋं
मधुसूदनऋद्धिनयनाभ्यां नमः वामपार्श्वे॥ ऐं १ ॠं त्रिविक्रमॠद्धिभ्यां
४२ नमः दक्षिणपादे॥ ऐं १ ऌं वामनऌरूपिणीभ्यां नमो वाकद्वयं॥ ऐं १ ॡं
४२ श्रीधरविलुप्ताभ्यां नमः दक्षिणोरौ॥ ऐं १ लृं हृषीकेशालूनदोषाभ्यां न-
मः वामोरौ॥ ऐं १ एं पद्मनाभएकनायिकाभ्यां नमः दक्षिणजानुनि॥
ऐं १ ऐं दामोदरऐंकारिणीभ्यां नमः वामजानुनी॥ ऐं १ ओं वासुदेवओं-
धवनीभ्यां नमः दक्षिणजंघायां॥ ऐं १ औं संकर्षणसर्वकामाभ्यां नमः
वामजंघायां॥ ऐं १ अं प्रद्युम्नअंजनप्रभाभ्यां नमः वामपादे॥ ऐं १ कं
भं शंकरभद्राभ्यां नमः दक्षिणपादादिऊरूमूलपर्यंतं॥ ऐं १ खं वं शर्व-
खगवलाभ्यां नमः वामपादादिऊरूमूलपर्यंतं॥ ऐं १ गं फं रुद्रफल-
प्रदाभ्यां नमः दक्षिणपार्श्वे॥ ऐं १ घं पं पशुपतिघोरपादाभ्यां नमः वामपा-
र्श्वे॥ ऐं १ ङं नं उग्रपंक्तिनासाभ्यां नमः दक्षिणदोर्मूले॥ ऐं १ चं धं महा-
देवचंद्रार्धधरणीभ्यां नमः वामदोर्मूले॥ ऐं १ छं दं भीमछंदोमयीभ्यां
नमः कंठे॥ ऐं १ जं थं ईशानजगत्स्रष्टानाभ्यां नमः मुखे॥ ऐं १ झं तं तत्पु-
रुषझंकृतिभ्यां नमः दक्षिणकर्णे॥ ऐं १ ञं णं अघोरज्ञानदाभ्यां नमः
वामकर्णे॥ ऐं १ टं ढं सद्योजातटंकढक्कधराभ्यां नमः भाले॥ ऐं १ ठं डं वा-
मदेवठंकृतिडामरीभ्यां नमः ब्रह्मरंध्रे॥ ऐं १ यं ब्रह्मयक्षिणीभ्यां नमः
मूलाधारे॥ ऐं १ रं प्रजापतिरंजनीभ्यां नमः स्वाधिष्ठाने॥ ऐं १ लं वे-

९ दक्षिणपादे ऐं अः अस्थि...

भ्यां लक्ष्मिभ्यां नमः मणिपुरे ॥ ऐं १० वं परमेष्ठि वज्रिणीभ्यां नमः अनाहते । ऐं
१० शं पितामहशारीधराभ्यां नमः विशुद्धौ ॥ ऐं १० षं विधातृपञ्जधारालयाभ्यां
नमः आज्ञायां ॥ ऐं १० सं विरंचि सर्वनायिकाभ्यां नमः भालमध्ये ॥ ऐं १० हं स्र
ष्टृ हसितानानाभ्यां नमः आलीने ॥ ऐं १० लं चतुराननललिताभ्यां नमः शिर
सि ॥ ऐं १० क्षं हिरण्यगर्भक्षमाभ्यां नमः ब्रह्मरंध्रे ॥ ऐं १० अं आं इत्यादिसक
ल त्रिमूर्त्यात्मकायै परादेव्यै वाग्यै नमः व्यापकं कुर्यात् ॥ इति त्रिमूर्ति
न्यासः ॥ ऐं १० अं आं इं एकलक्षकोटिभेदप्रणवादि एकाक्षरात्मका
खिलमंत्राधिदेवतायै सकलफलप्रदायै एककूटेश्वर्यं वादेवादेव्यै नमः
मूलाधारे ॥ ऐं १० ईं उं ऊं द्वि लक्षकोटिभेद हंसादि द्वि रक्षरात्मकाखिल
मंत्राधिदेवतायै सकलफलप्रदायै द्विकूटेश्वर्यं वादिन्यै नमः स्वाधिष्ठाने ॥
ऐं १० ऋं ॠं लृं त्रिलक्षकोटिभेदत्र [illegible] दित्रिरक्षरात्मा खिलमंत्राधि
देवतायै सकलफलप्रदायै त्रिकूटेश्वर्यं वादेव्यै नमः मणिपूरे ॥ ऐं १० ॡं
एं ऐं चतुर्लक्षकोटिभेद वज्रादि चतुरक्षरात्मकाखिलमंत्राधिदेवता
यै सकलफलप्रदायै चतुःकूटेश्वर्यै वादेव्यै नमः अनाहते ॥ ऐं १० ओं औं
अं अः पंचलक्षकोटिभेदसूर्यादि पंचाक्षरात्मकाखिलमंत्राधिदेवता
यै सकलफलप्रदायै पंचकूटेश्वर्यं वादेव्यै नमः विशुद्धौ ॥ ऐं १० कं खं गं घ
ट् लक्षकोटिभेदस्कंदादि षडक्षरात्मा खिलमंत्राधिदेवतायै सकलफ
लप्रदायै षट्कूटेश्वर्यं वादेव्यै नमः आज्ञायां ॥ ऐं १० ङं ॐ वंसप्तलक्षको

टिभेदगणपत्यादिसप्ताक्षरात्मकाखिलमंत्राधिदेवतायैसकलफलप्रदायै
सप्तकूटैश्वर्यवादेव्यैनमः बिंदौ॥ ऐं १० छंजंझं अष्टकोटिभेदवटुकाद्य
ष्टाक्षरात्मकाखिलमंत्राधिदेवतायैसकलफलप्रदायैअष्टकूटैश्वर्यवा
४२ देव्यैनमः बिंद्वर्धे॥ ऐं १० ञंटंठं नवलक्षकोटिभेदब्रह्मादिनवाक्षरात्म
43 काखिलमंत्राधिदेवतायैसकलफलप्रदायैनवकूटैश्वर्यवादेव्यैनमः
निरोधिकायां॥ ऐं १० डंढंणं दशलक्षकोटिभेदविष्ण्वादिदशाक्षरात्मिका
खिलमंत्राधिदेवतायैसकलफलप्रदायैदशकूटैश्वर्यवादेव्यैनमः नादे॥
ऐं १० तंथंदं एकादशलक्षकोटिभेदरुद्राद्यैकादशाक्षरात्मकाखिल-
मंत्राधिदेवतायैसकलफलप्रदायैएकादशकूटैश्वर्यवादेव्यैनमः ना
दांते॥ ऐं १० धंनंपं द्वादशलक्षकोटिभेदवाण्यादिद्वादशाक्षरात्मकाखि
लमंत्राधिदेवतायैसकलफलप्रदायैद्वादशकूटैश्वर्यवादेव्यैनमः ध्रु
वमंडले॥ ऐं १० फंबंभं त्रयोदशलक्षकोटिप्रभेदलक्ष्म्यादित्रयोदशा
क्षरात्मकाखिलमंत्राधिदेवतायैसकलफलप्रदायैत्रयोदशकूटैश्व
र्यवादेव्यैनमः व्यापिकायां॥ ऐं १० मंयंरं चतुर्दशलक्षकोटिभेदगौर्या
दिचतुर्दशाक्षरात्मकाखिलमंत्राधिदेवतायैसकलफलप्रदायैचतु
र्दशकूटैश्वर्यवादेव्यैनमः समनास्थाने॥ ऐं १० लंवंशं पंचदशकूटल
क्षकोटिभेददुर्गादिपंचदशाक्षरात्मकाखिलमंत्राधिदेवतायैस ४२
कलफलप्रदायैपंचदशकूटैश्वर्यवादेव्यैनमः उन्मनीस्थाने॥ ऐं १०

षं सं हं ळं क्षं षोडशा लक्ष कोटि भेद त्रिगुणादि षोडशाक्षरात्मकाखिलमंत्रा
त्राविदेवयै सकलफलप्रदायै षोडशाकूटैश्वर्यं वादेव्यै नमः शिखस्थाने। ऐं १०
अं आं मित्यादि सकल मंत्राधिपायै परादेव्यं वायै नमः व्यापकं कुर्यात्। इति
मंत्रन्यासः॥ ऐं १० अं आं सहस्त्र कोटि ऋषि कुलसेवितायै निवसं वादेव्यै
नमः दक्षिणपादे॥ ऐं १० इं ईं सहस्त्रकोटि योगिनी कुलसेवितायै प्रतिष्ठां वा
देव्यै नमः वामपादे॥ ऐं १ उं ऊं सहस्त्रकोटि तपस्वि कुलदेवतायै विद्यां वादे
व्यैनमः दक्षिण गुल्फे। ऐं १० ऋं ॠं सहस्त्र कोटि शांत कुलिसेवितायै शां
तिं वादेव्यै नमः वामगुल्फे॥ ऐं १० लृं लॄं सहस्त्र कोटि मुनि कुलसेवि
तायै शांत्यतीतां वादेव्यै नमः दक्षिण जंघायां। ऐं ऐं सहस्त्र कोटि देवकु
लसेवितायै हृल्लेखां वादेव्यै नमः वामजंघायां। ऐं १० ओं औं सहस्त्र को
टि राक्षस कुल सेवितायै गगनां वादेव्यै नमः दक्षिण जानुनि। ऐं १० अं
अः सहस्त्र कोटि विद्याधर कुलसेवितायै रक्तां वादेव्यै नमः वामजा
नुनि। ऐं १० कं खं सहस्त्र कोटि सिद्ध कुलसेवितायै महोच्छुष्मां वादेव्यै
नमः दक्षिणोरौ। ऐं १० गं घं सहस्त्र कोटि साध्य कुलसेवितायै करालि
कां वादेव्यै नमः वामोरौ। ऐं १० ङं चं सहस्त्र कोटि अप्सरः कुलसेविता
यै जयां वादेव्यै नमः दक्षिणोरुमूले। ऐं १० छं जं सहस्त्र कोटि गंधर्व कु
लसेवितायै विजयां वादेव्यै नमः वामोरुमूले। ऐं १० झं ञं सहस्त्र कोटि
गुह्यकुलसेवितायै अजितां वादेव्यै नमः दक्षिण पार्श्वे। ऐं १० टं ठं सह

कोटिपिशाचकुलसेवितायै अपराजितां वादेव्यै नमः वामकट्यां॥
ऐं१० डंढंसहस्रकोटिकिन्नरकुलसेवितायै वामां वादेव्यै नमः दक्षिण
४४ स्तने॥ ऐं१० णंतंसहस्रकोटिपन्नगकुलसेवितायै ज्येष्ठायै नमः वाम
स्तने॥ ऐं१० थंदंसहस्रकोटिपितृकुलसेवितायै रौद्र्यं वादेव्यै नमः द
५५ क्षिणबाहुमूले॥ ऐं१० धंनंसहस्रकोटिगयोशकुलसेवितायै मायां वा
देव्यै नमः बाहुमूले॥ ऐं१० पंफंसहस्रकोटिभैरवकुलसेवितायै कुंड
ल्यं वादेव्यै नमः दक्षिणभुजे॥ ऐं१० बंभंसहस्रकोटिवटुककुलसेवितायै
काल्यां वादेव्यै नमः वामभुजे॥ ऐं१० मंयंसहस्रकोटिक्षेत्रेशसेविता
येकालरात्र्यं वादेव्यै नमः दक्षिणस्कंधे॥ ऐं१० रंलंसहस्रकोटिप्रथम
सेवितायै भगवत्यं वादेव्यै नमः वामस्कंधे॥ ऐं१० वंशंसहस्रकोटि
ब्रह्मकुलसेवितायै सर्वैश्वर्यं वादेव्यै नमः दक्षिणकर्णे॥ ऐं१० षंसं
सहस्रकोटिविष्णुकुलसेवितायै सर्वज्ञां वादेव्यै नमः वामकर्णे॥ ऐं१०
हंळंसहस्रकोटिरुद्रकुलसेवितायै सर्वकर्त्रीं वादेव्यै नमः ललाटे॥
ऐं१० क्षंसहस्रकोटिनरावरकुलसेवितायै परां वादेव्यै नमः ब्रह्मरं
ध्रे॥ ऐं१० अंआमिसादिसकलदेवतारूपायै परां वादेव्यै नमः व्यापकं
कुर्यात्॥ इति देवतान्यासः॥ ऐं१० कं५ अनंतकोटिभूचरीकुलसेवि ४४
तायै आं क्षां मंगलां वादेव्यै आं क्षां ब्रह्माण्यां वादेव्यै अनंतकोटिभूत
कुलसेवितायै अं क्षं असितांगभैरवाय नमः मूलाधारे॥ ऐं१० चं५

अनंतकोटिखेचरीकुलसेवितायैं चर्चिकांबादेव्यै ह्रूंमाहेश्वर्यंबादे
व्यै अनंतकोटिवेताल कुलसेवितायह्रूं ह्रूं चर्चिकानाथाय ह्रूं ह्रूं रुरुभै
रवायनमः स्वाधिष्ठाने ॥ ऐं १० हं ५ अनंतकोटिपातालचरीकुलसेविता
यैऊं हां योगेश्वरीअंबादेव्यै ऊं हां कौमारीअंबादेव्यै अनंतकोटिपि
शाचकुलसेवितायऊं हं योगेश्वरनाथायऊं हं चंडभैरवायनमः मणि
पुरे ॥ ऐं १० तं ५ अनंतकोटिदिक्चरीकुलसेवितायै क्रूं सांसिध्यंबादे
व्यै क्रूं सांवैष्णव्यंबादेव्यै अनंतकोटिअपस्मारकुलसेविताय क्रूं सं
हरसिद्धनाथाय क्रूं सं क्रोधभैरवनाथायनमः अनाहते ॥ ऐं १० पं ५ अ
नवकोटिसहचरीकुलसेवितायै ल्रूं भद्यंबादेव्यै ल्रूं षं वाराहीअंबादे
व्यै अनंतकोटिब्रह्मराक्षसकुलसेविताय ल्रूं षं भद्रनाथाय ल्रूं षं उन्म
त्तभैरवायनमः विशुद्धौ ॥ ऐं १० यं ४ अनंतकोटिगिरिचरीकुलसेविता
यै एं शां किल्किलीबादेव्यै एं शां इन्द्राण्यंबादेव्यै अनंतकोटिचेटक
कुलसेवितायएं शां किल्किलनाथाय एं शां कपालभैरवनाथायनमः आ
ज्ञायां ॥ ऐं १० शं ४ अनंतकोटिवनचरीकुलसेवितायै ॐ औं अवाकाल
रात्र्यंबादेव्यै ऐं १० शं ४ अं वं भीषणभैरवायनमः भाले ॥ ऐं १० ळं क्षं
अं नाचामुंडांबादेव्यै अनंतकोटिप्रेतकुलसहितायै ॐ वं कालरात्रि
नाथायनमः ऐं १० ळं क्षं अनंतकोटिजलचरीकुलसेवितायै अः लां
भीषणांबादेव्यै अः लां महालक्ष्म्यंबादेव्यै अनंतकोटिडाकिनीकु

नेत्रितायअंळं भीषणनाथाय अंलं संहारभैरवनाथाय नमः अं
सरंध्रोत्ऽऐं १० अंआं मित्यादि समस्तमुच्चार्य अनंतकोटिमातृ भैरव
४५ कुळसेवितायै मातृदेव्यै नमः इति व्यापकं कुर्यात् ॥ इति मातृका
भैरव न्यासः ॥ ॥ इति श्रीमहाषोढान्यासः संपूर्णः समाप्तः ॥ ॥
45 शाके १७३५ तारकनाम संवत १८७० भाद्रपद शुद्ध १४ गुरुवासरे तद्दिने पं
ढरीक्षेत्री श्रीनारायण संन्निधानि प्रथमप्रहरी तारक नाम संवत्सरे
हस्ताक्षर बाळकृष्णानंद सरस्वती श्रीकाशि मंगळागौरीमंठ सध्या
स्थानी श्रीनारायणक्षेत्री समाप्तः ॥ ॥ श्रीनारायणार्पमस्तु ॥ ॥
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ॥ यदि शुद्धमशुद्धं वा मम
दोषो न दीयते ॥ ॥ ॥ श्रीगणेशाय नमः श्री
दुर्गे दुर्गट भारि तुज वीण संसारि अनाथ नाथे अंबे क
रुणा विस्तारि वारि वारी दुःख ते मारी हारी पडलो जाला
दुस्तर रा ते वारी जय देव जय देव महेशासुर मर्दिनी सुर पडलो
सुखरा विश्वर वरदे सद्गुरु जोव गे ॥ १ ॥ त्रिभूवन
४५